अन्वयः–(यः नखचरणपाणिरसनादशनच्छदतालुलोचनान्तेषु सप्तसु रक्तः स्यात्–स च सप्ताङ्गां लक्ष्मीं लभते) । अस्यार्थः–जो नख चरण–हाथ–जीभ–होठ–तालु–नेत्रोंके अंत इन सात अंगोंमें ललाई होय तौ लक्ष्मीको प्राप्त होता है ॥ ८९ ॥

षट्कं कक्षावक्षःकृकाटिका नासिकानखास्यमिति ॥
यस्येदमुन्नतं स्यादुन्नतयस्तस्य जायन्ते ॥ ९० ॥

अन्वयः–(यस्य इदं षट्कम् कक्षा वक्षः कृकाटिका नासिका नखाः आस्यम् इति उन्नतं भवति तस्य उन्नतयः जायन्ते) । अस्यार्थः–जिस पुरुषकी बगल, छाती, गर्दनकी घेंटी, नाक, नख, मुख ये ६ अंग ऊंचे होंय तिसको उच्चपद अर्थात् बढवारी प्राप्त होती है ॥ ९० ॥

दंतत्वक्केशांगुलिपर्वनखं चेति पंच सूक्ष्माणि ॥
धनलक्षणैरुपेता भवन्ति ते प्रायशः पुरुषाः ॥ ९१ ॥

अन्वयः–(येषां पुरुषाणां दंतत्वक्केशांगुलिपर्वनखाः एतानि पंच सूक्ष्माणि ते पुरुषाः प्रायशः धनलक्षणैः उपेता भवन्ति) । अस्यार्थः–जिन पुरुषोंके दाँत–त्वचा–बाल–अंगुलियोंके पोरुवे और नख ये पाँच पतले होंय तो वे पुरुष बहुधा धनलक्षणयुक्त होवे हैं अर्थात् धनवान् होते हैं ॥ ९१ ॥

नयनकुचौ रसनाहनुभुजमिति यस्य पंचकं दीर्घम् ॥
दीर्घायुर्वित्तकरः पराक्रमी जायते स नरः ॥ ९२ ॥

अन्वयः-(यस्य इति पंचकं दीर्घं नयने कुचौ रसना-हनु-भुजं स नरः पराक्रमी वित्तकरः दीर्घायुर्जायते)। अस्यार्थः-जिसके ये पाँच अंग बडे होंय नेत्र चूँची जीभ कपोलोंके हाड और भुजा सो मनुष्य बलवान् धनवान् बड़ी आयुवाला होता है ॥ ९२ ॥

भालमुरोवदनमिति त्रितयं भूमीश्वरस्य विपुलं स्यात् ॥
ग्रीवाजंघामेहनमिति त्रिकं लघु महीशस्य ॥ ९३ ॥

अन्वयार्थौ-(भूमीश्वरस्य एतत्रितयं भालम् उरः वदनम् इति विपुलं स्यात्) राजाके ये तीन ललाट १ छाती २ मुख ३ चौडे होते हैं और (महीशस्य एतत्रयं ग्रीवा जंघा मेहनम् इति लघु स्यात्) राजाकी ये तीन गर्दन जाँघ इंद्री आदि छोटी होती हैं ॥ ९३ ॥

यस्य स्वरोथ नाभिः सत्त्वमिदं च त्रयं गभीरं स्यात् ॥
सप्तांबुधिकांच्या हि भूमेः स करग्रहं कुरुते ॥ ९४ ॥

अन्वयार्थौ-(यस्य स्वरः अथ नाभिः सत्त्वम् इदं त्रयं गभीरं स्यात्) जिसका शब्द टूंडी पराक्रम ये तीन गहरे होंय तौ (स सप्ताम्बुधिकांच्या भूमेः करग्रहं कुरुते) सो ७ समुद्र हैं कांची क्षुद्रघंटिका जिसके अर्थात् कटिबंधिनी पृथ्वीको व्याहता है अर्थात् पृथ्वीका मालिक होता है ॥ ९४ ॥

स्मरशास्त्रविनिर्दिष्टाः शशो वृषो हय इति त्रयो भेदाः ॥
जायन्ते मनुजानां क्रमेण तल्लक्षणं वयं ब्रूमः ॥ ९५ ॥

अन्वयार्थौ-(स्मरशास्त्रविनिर्दिष्टाः मनुजानां शशः वृषः हयः इति त्रयो भेदाः जायन्ते) कामशास्त्रके कहे हुए मनुष्योंके खरगोश बैल घोडा ये तीन भेद होते हैं और (क्रमेण तल्लक्षणं वयं ब्रूमः) उनके क्रमसे लक्षण हम कहते हैं ॥ ९५ ॥

लिङ्गं षडंगुलानि स्यादष्टौ वा शशः स पुमान् ॥
नव दश चैकादश वा तदपि पुनर्यस्य स वृषाख्यः ॥९६॥

अन्वयार्थौ-(यस्य लिंगं षट् वा अष्टौ अंगुलानि स स्फुटं शशः पुमान स्यात्) जिसका लिंग ६ वा ८ अंगुलका प्रकट होय वह खरगोशकी संज्ञाका पुरुष होता है और (यस्य नव दश वा एकादश अंगुलानि तदपि लिंगं स पुरुषः वृषाख्यः स्यात्) जिसका ९--१०--११ अंगुलका लिंग होय सो पुरुष बैलकी संज्ञाका होताहै ॥ ९६ ॥

द्वादश वा लिंगं स्यात्त्रयोदशादीनि चांगुलानि भवेत् ॥
जातोद्भवस्य मानं हयाख्यया निगदितः सोऽपि ॥९७॥

अन्वयार्थौ-(यस्य जातोद्भवस्य लिंगं द्वादश वा त्रयोदशादीनि अंगुलानि मानं स्यात्) जिस पुरुषका आदि समयसेही लेकरके लिंग १२--१३ अंगुलके प्रमाणका होय सो (सः अपि हयाख्यया निगदितः कथितः) उसको घोड़ेकी संज्ञाका कहा है ॥ ९७ ॥

रतिषु शशवृषहयानां सह भृत्यादिभिरकृत्रिमा प्रीतिः ॥
मेहनं वराङ्गनार्योः परस्परेण प्रमाणैक्यात् ॥९८ ॥

अन्वयार्थौ-(शशवृषहयानां रतिषु मेहनं वराङ्गनार्योः प्रमाणैक्यात्) खरगोश बैल घोड़ा पुरुषोंकी रतिमें इंद्री और योनिके एक समान प्रमाण होनेसे (भृत्यादिभिः सह परस्परेण कृत्रिमा प्रीतिर्भवति) सेवक आदिके साथ करी हुई प्रीति जैसेको तैसी रति अच्छी होती है ॥ ९८ ॥

अन्नं क्षुधि पानं तृषि पथि श्रमे वाहनं भवेद्रक्षा ॥
इति भवति यस्य समये धन्यं प्रवदंति तं संतः ॥ ९९ ॥

अन्वयार्थौ-(यस्य समये क्षुधि अन्नं तृषि पानं पथि श्रमे वाहनं भवेत्) जिसको समयके विषे भूखमें तौ अन्न और प्यासमें जल और थकावटमें सवारी होय तौ (इति रक्षा भवेत्) ये बडी रक्षा होतीहै और (संतः तं पुरुषं धन्यं प्रवदंति) पंडित उस पुरुषको धन्य कहते हैं ॥ ९९ ॥

इति श्रीमहत्तमश्रीनृसिंहात्मजदुर्लभराजविरचिते सामुद्रतिलकाख्यपरनाम्नि नरलक्षणशास्त्रे शरीराधिकारो द्वितीयः ॥ २ ॥

अंगप्रत्यंगयुतं सकलं शारीरमिदमिति प्रोक्तम् ॥
आवर्तप्रभृतीनामनुक्रमाल्लक्षणं वयं ब्रूमः ॥ १ ॥

अन्वयार्थौ–(अंगप्रत्यंगयुतं सकलम् इदं शारीरम् इति प्रोक्तम्) छोटे सब अंगप्रत्यंग सहित यह यही शारीरलक्षण कहाहै सो (अनुक्रमात् आवर्त्तप्रभृतीनां लक्षणं वयं ब्रूमः) अब क्रमसे चक्र वा भौंरी आदिके लक्षण हम कहते हैं ॥ १ ॥

रोमत्वग्बालभवः स्यादावर्तः शुभस्त्रेधा ॥
शस्तो दक्षिणवलितः स्निग्धो व्यक्तः परो न शुभः ॥ २ ॥

अन्वयार्थौ–(रोमत्वग्बालभवः आवर्त्तः त्रेधा स्यात्) रोंगटे–त्वचा–बाल इनसे उत्पन्न हुई जो भौंरी तीन प्रकारकी होतीहै और (दक्षिणवलितः स्निग्धः व्यक्तः शुभः शस्तः परो न शुभः) जो दाहिनी ओरकी अच्छी प्रकट होय तौ शुभ है और जो बांईं ओर होय तो अशुभ है ॥ २ ॥

करतलपदश्रुतियुग्मे नाभौ वा त्वग्भवो नृणाम् ॥
सस्यादपरौ द्वावपि लक्षणविद्भिर्ज्ञेयौ यथास्थानम् ॥ ३ ॥

अन्वयार्थौ–(नृणां करतलपदश्रुतियुग्मे वा नाभौ त्वग्भवः सः आवर्तः स्यात्) मनुष्योंके दोनों हाथ, दोनों पाँव, दोनों कान और टूँडी–त्वचामें उत्पन्न भौंरी होतीहै और (अपरौ द्वौ अपि लक्षणविद्भिः यथास्थानं ज्ञेयौ) जो दो हैं उनके भी लक्षण जाननेवालोंको यथास्थान जैसी जगह हो वैसे जानने चाहियें ॥ ३ ॥

सव्यापसव्यभागे शिरसि स्याद्यस्य दक्षिणावर्तः ॥
श्वेतातपत्रलक्ष्मा लक्ष्मीः करवर्तिनी तस्य ॥ ४ ॥

अन्वयार्थौ–(यस्य शिरसि सव्यापसव्यभागे दक्षिणावर्तः स्यात्) जिसके मस्तकमें बामे दाहिने विभागमें जो दक्षिणावर्त चक्र वा भौंरी होय (तस्य श्वेतातपत्रलक्ष्मा लक्ष्मीः (करवर्तिनी भवति) तिसके उज्वल छत्रकी शोभायुक्त लक्ष्मी हाथमें आती है ॥ ४ ॥

रोमावर्तः स्निग्धो भ्रूयुगमध्ये प्रदक्षिणो व्यक्तः ॥
यस्योर्णाख्यः पूर्णः सोम्बुधिकांचेर्भुवो भर्ता ॥ ५ ॥

अन्वयार्थौ–यस्य भ्रूयुगमध्ये व्यक्तः प्रदक्षिणः स्निग्धः रोमावर्तः पूर्णः ऊर्णाख्यः स्यात) जिस पुरुषकी दोनों भौंहके बीचमें प्रकट दाहिनी ओर झुकी हुई अच्छी भौंरी वा चक्र पूरा ऊर्णाख्य नामका होय (सः अम्बुधि-काञ्चीभुवः भर्ता भवति) सो पुरुष समुद्र है कांची कटिबन्धिनी जिसकी ऐसी पृथ्वीका स्वामी अर्थात् संपूर्ण पृथ्वीका पालनेवाला होताहै ॥ ५ ॥

भुजयुग्मे यस्य स्यादावर्तं द्वितीयमंगदप्रतिमम् ॥
नियतं सोखिलभूमिं पुरुषो निजवाहनां वहति ॥ ६ ॥

अन्वयार्थौ–(यस्य भुजायुग्मे द्वितीयम् अंगदप्रतिमम् आवर्तं स्यात) जिसकी दोनों भुजाओंके बीचमें दूसरे बाजूकासा चक्र चिह्न वा भौंरी होय तो (सः पुरुषः नियतम् अखिलभूमिं निजवाहनां वहति) सो पुरुष निश्चय करिके संपूर्ण पृथ्वीको अपनी भुजाओंसे धारण करे ॥ ६ ॥

यस्य करांभोजतले दक्षिणवलितो भवेदतिव्यक्तः ॥
परिचितशौचाचारो धर्मपरः स्यात्स वित्ताढ्यः ॥ ७ ॥

अन्वयार्थौ–(यस्य कराम्भोजतले दक्षिणवलितः अतिव्यक्तः भवेत) जिसके करकमल अर्थात हथेलीमें दाहिनी ओर चिह्न वा साथिया बहुत प्रकट होय तो (सः परिचितशौचाचारः धर्मपरः वित्ताढ्यः स्यात्) सो पुरुष जानाहै पवित्रताका आचार जिसने ऐसा धर्ममें तत्पर और धनवान् होय॥ ७॥

भाग्यवतां पंचांगुलिशिरःसु सौख्याय दक्षिणावर्तः ॥
प्रायः पुंसां वामावर्तो दुःखाय पुनरेषः ॥ ८ ॥

अन्वयार्थौ–(भाग्यवतां पुंसां पंचांगुलिशिरःसु दक्षिणावर्तः सौख्याय भवति) धनवान् पुरुषोंके शिरमें ५ अंगुल प्रमाण दाहिनी ओरको झुका हुवा चक्र वा चिह्न अर्थात् भौंरी सुखदायक होतीहै और (पुनः एषः वामावर्तः

प्रायः दुःखाय भवति) जो वही बाँई ओरको झुकी हुई भौंरी होय तो बहुधा दुःखदाई होतीहै ॥ ८ ॥

श्रुतियुगनाभ्यावर्ताः प्रदक्षिणाः श्रेयसे भवंति नृणाम् ॥
चूडावर्तोप्येकः श्रेष्ठतरो दक्षिणः शिरसि ॥ ९ ॥

अन्वयार्थौ-(नृणां प्रदक्षिणाः श्रुतियुगनाभ्यावर्ताः श्रेयसे भवन्ति) मनुष्योंके दाहिनी ओर झुके हुए दोनों कान और नाभिके चक्र शुभकारक होतेहैं और (नृणां शिरसि एकः अपि चूडावर्तः दक्षिणः श्रेष्ठतरो भवति) मनुष्योंके शिरमें एकही चूडावर्त्त नाम चक्र दाहिनी ओरका बहुत श्रेष्ठ होताहै॥९॥

शीर्षे वामे भागे वामावर्तो भवेत्स्फुटो यस्य ॥
स क्षुत्क्षामो भिक्षां रूक्षां निर्लक्षणो लभते ॥ १० ॥

अन्वयार्थौ-यस्य शीर्षे वामे भागे वामावर्तः स्फुटः भवेत) जिसके शिरमें बाँई ओरको चक्र अर्थात् भौंरी प्रकट होय तो (क्षुत्क्षामः सः निर्लक्षणः रूक्षां भिक्षां लभते) भूँखका मारा अभागा रूखी भीखको प्राप्त होताहै ॥ १० ॥

वामो दक्षिणपार्श्वे प्रदक्षिणो वामपार्श्वके यस्य ॥
न तु तस्य चरमकाले भोगो नास्त्यत्र सन्देहः ॥ ११ ॥

अन्वयः-(यस्य दक्षिणपार्श्वे वामः वामपार्श्वे प्रदक्षिणः भवति-तस्य चरमकाले भोगो नास्ति अत्र सन्देहो न तु)। अस्यार्थः-जिसकी दाहिनी ओर तौ बाँई होय-और बाँई ओर दाहिनी होय-तिसको पिछली अवस्थामें भोग नहीं होय इसमें सन्देह नहीं ॥ ११ ॥

अंतर्ललाटपट्टं व्यक्तावर्त्तो ललामवद्यस्य ॥
वामोऽथ दक्षिणो वा स्वल्पायुर्दुःखितश्च स्यात् ॥ १२ ॥

अन्वयार्थौ-(यस्य ललाटपट्टम् अन्तः ललामवत् व्यक्तावर्तः वामः अथवा दक्षिणः भवति) जिसके लिलारके ऊपर प्रकट है भौंरी-जिसमें ऐसा रत्नके

समान बाँयाँ अथवा दाहिना चक्र होय तो (सः स्वल्पायुः दुःखितश्च स्यात्) वह थोडी आयुवाला और दुःखी होय ॥ १२ ॥

यस्यावर्तद्वितयं सुव्यक्तं भवति पादतलमध्ये ॥
नक्तंदिनमतिदीनो भूमिं स भ्रमति मतिहीनः ॥ १३ ॥

अन्वयार्थौ-(यस्य पादतलमध्ये आवर्तद्वितयं सुव्यक्तं भवति) जिसके पांवके तलुवेमें दो आवर्त नाम चक्र प्रकट होंय तो (अतिदीनः मतिहीनः सः नक्तंदिनं भूमिं भ्रमति) सो अतिदीन अर्थात् बहुत गरीब--मतिहीन--मूर्खसा रातदिन पृथ्वीमें घूमता रहे ॥ १३ ॥

अथ गतिकथनम् ।

सुखसंचरितपादा मयूरमार्जारसिंहगतितुल्या ॥
दीर्घक्रमा सुलीला, भाग्यवतां स्याद्गतिः सुभगा ॥१४॥

अन्वयः-(भाग्यवतां सुखसंचरितपादा मयूरमार्जारसिंहतुल्या दीर्घक्रमा सुलीला सुभगा गतिः भवति) । अस्यार्थः--भाग्यवानोंका सुखसे है पैरोंका चलना जिसमें मोर-बिल्ली-सिंह इनकीसी चालके समान लम्बा है डँगका रखना जिसमें अच्छी लीलायुक्त सुंदर चाल होतीहै ॥१४॥

गतिभिर्भवन्ति तुल्या ये च समा द्विरदनकुलहंसानाम् ॥
वृषभस्यापि नरास्ते सततं धर्मार्थकामपराः ॥ १५ ॥

अन्वयार्थौ-(ये गतिभिः द्विरदनकुलहंसानां वृषभस्यापि समाः भवन्ति) जो मनुष्य चालसे हाथी-नौला-हंस-बैलकीसी समान होतेहैं (ते नराः सततं धर्मार्थकामपरा भवन्ति) वे मनुष्य निरंतर धर्म, अर्थ, काममें तत्पर होतेहैं ॥ १५ ॥

गोमायुकरभरासभकूकलासशशकभेकमृगैः ॥
येषां गतिः समाना ते गतसुखराजसन्मानाः ॥ १६ ॥

अन्वयः-(येषां गतिः गोमायुकरभरासभकृकलासशशकभेकमृगैः समाना ते गतसुखराजसन्मानाः भवन्ति)। अस्यार्थः--जिनकी चाल गीदड--ऊंट--

गधा--गिरगिट--खरगोश--मेंढक--हिरण--इनकी समान होय तो--वे, गया है सुख और राजसन्मान जिनका ऐसे होते हैं ॥ १६ ॥

विषमा विकटा मंदा लघुक्रमा चंचला द्रुता स्तब्धा ॥
आभ्यंतराऽथ बाह्या लग्नपदा वा गतिर्न शुभा ॥१७॥

अन्वयः-(यस्य विषमा विकटा मंदा लघुक्रमा चंचला द्रुता स्तब्धा आभ्यन्तरा अथ बाह्या वा लग्नपदा ईदृशी गतिः शुभा न)। अस्यार्थः-जिसकी ऊंची नीची, भयकारी, धीरजकी छोटी डँग--फुरतीकी--शीघ्र--रुकरुकके भीतर बाहर जिसमें पांव भिडते जायँ ऐसी चाल अशुभ अर्थात् बुरी होतीहै ॥ १७ ॥

धनिनां गमनं स्तिमितं समाहितं शब्दहीनमस्तब्धम् ॥
ह्रस्वप्लुतानुविद्धं विलम्बितं स्याद्दरिद्राणाम् ॥ १८ ॥

अन्वयार्थौ--(धनिनां गमनं स्तिमितं समाहितं शब्दहीनम् अस्तब्धं स्यात्) धनवानोंकी चाल अच्छी एकसी--शब्द करिके हीन--रुकावटकी नहीं ऐसी होतीहै और (ह्रस्वप्लुतानुविद्धं विलंबितं दारिद्राणां स्यात्) छोटी छोटी डँगयुक्त, धीरे धीरे ऐसी चाल दरिद्रियोंकी होतीहै ॥ १८ ॥

अथ छायाकथनम् ।

छादयति नरस्याङ्गे लक्षणमत्यन्ततो नरश्छाया ॥
सा पार्थिवी तथाऽथ ज्वलनभवा वायवी व्योम्नी ॥१९॥

अन्वयार्थौ--(छाया नरस्य अंगे लक्षणं छादयति सा छाया पार्थिवी अत्यन्ततः नरः भवति) छाया अर्थात् तेज मनुष्यके अंगमें लक्षणको ढक देय सो छायाका नाम पार्थिवी अर्थात् पृथ्वी सम्बन्धिनी है सो मनुष्य बहुत अच्छा होताहै और (तथा ज्वलनभवा अथ व्योम्नी वायवी भवति) जैसे अग्निसे आकाशसे और पवनसे उत्पन्न हुई होतीहै ॥ १९ ॥

भवति शुभाशुभफलदा निजतेजस्तन्वती बहिर्देहात् ॥
विमलस्फटिकघटान्तर्विलसति सा दीपकलिकेव ॥ २० ॥

अन्वयार्थौ-(छाया शुभाशुभफलदा भवति) छाया शुभ और अशुभ फलकी देनेवाली होतीहै और (देहात् बहिर्निजतेजस्तन्वती भवति) देहसे बाहिर वही छाया अपने तेजको फैलाती है और (सा विमलस्फटिकघटान्तः-दीपकलिका इव विलसति) कैसे कि निर्मल स्फटिकके घड़ेमें दीपककी ज्योति जैसे प्रकाशवान् अर्थात् शोभित होतीहै ॥ २० ॥

स्निग्धद्विजनखलोमत्वक्केशा पार्थिवी स्थिरा रेखा ॥
नयनहृदयाभिरामा दत्ते धनधर्मसुखभोगान् ॥ २१ ॥

अन्वयः-(स्निग्धद्विजनखलोमत्वक्केशा रेखा स्थिरा नयनहृदयाभिरामा एतादृशी पार्थिवी छाया धनधर्मसुखभोगान् दत्ते) । अस्यार्थः-अच्छे दांत--नख--रोम--त्वचा--बाल और स्थिर रेखा जिसमें होतेहैं और नेत्र-चित्तको सुंदर लगे ऐसी पार्थिवी छाया धन धर्म और सुख भोग इनको देनेवाली होतीहै ॥ २१ ॥

आप्याऽभिनवाम्भोदप्रच्छन्नजलसन्निभा छाया ॥
सर्वार्थसिद्धिजननी जनयति सौभाग्यमिह पुंसाम् ॥ २२ ॥

अन्वयार्थौ-(अभिनवाम्भोदप्रच्छन्नजलनिभा छाया आप्या) नवीन जो मेघ जिससे गिरा जो जल-उसकी तुल्य जो छाया है तिसका नाम आप्या है (सा छाया सर्वार्थसिद्धिजननी) सो छाया सर्व अर्थके सिद्धिके उत्पन्न करनेवाली है ॥ २२ ॥

ज्वलनप्रभा च बालार्कप्रवालकनकाग्निपद्मरागनिभा ॥
पौरुषपराक्रमैर्वा जयमर्थं तनुभृतां तनुते ॥ २३ ॥

अन्वयार्थौ-(या बालार्कप्रवालकनकाग्निपद्मरागनिभा भवति) जो उदय-हुआ सूर्य--मूँगा--सोना--अग्नि--रत्न इनकी तुल्य होय (सा छाया ज्वलनप्रभा भवति) सो छाया ज्वलनप्रभा नाम है (सा ज्वलनप्रभा तनुभृतां पौरुष-

पराक्रमैर्जयम् अर्थं तनुते) वही ज्वलनप्रभा छाया मनुष्योंके पौरुष और पराक्रम करके जय और अर्थको फैलाती है ॥ २३ ॥

रूक्षा मलिना दीना चला खला मारुती भवेच्छाया ॥
बधबंधबंधनपरा वित्तविनाशं नृणां कुरुते ॥ २४ ॥

अन्वयार्थौ–(या छाया रूक्षा मलिना दीना चला खला सा छाया मारुती भवति) जो छाया–मैली हीन--चलायमान--बुरी इनकी तुल्य जो होय सो छाया मारुती नाम है (सा छाया बधबंधबंधनपरा नृणां वित्तविनाशं कुरुते) सो छाया मारण और बंधनकी करनेवाली और मनुष्योंके धनका नाश करनेवाली है ॥ २४ ॥

स्वच्छा स्फटिकमणिनिभा प्रोद्दामा देहिनामिह व्योम्नी ॥
प्रायः श्रेयोनिधिसुखधनसुतसौभाग्यदा पुंसाम् ॥ २५ ॥

अन्वयार्थौ–(पुंसां या छाया स्वच्छा स्फटिकमणिनिभा प्रोद्दामा सा छाया व्योम्नी) पुरुषोंकी जो छाया निर्मल–स्फटिकमणिकी तुल्य अत्यन्त सुंदर ऐसी होय सो व्योम्नी नाम छाया है (सा छाया इह देहिनां प्रायः श्रेयोनिधिसुखधनसुतसौभाग्यदा भवति) सो छाया मनुष्योंको बहुधा कल्याण, लक्ष्मी, सुख, धन, पुत्र, सौभाग्य इनके देनेवाली है ॥ २५ ॥

अर्काच्युतेन्द्रयमशशिप्रतीकाशा लक्षणैस्तु फलैः ॥
अन्याः पंच पुनस्ताः प्रवदंत्यपरे समसंपदो नैतत् ॥ २६ ॥

अन्वयः–(अर्काच्युतेन्द्रयमशशिप्रतीकाशा अन्याः ताः पंच छायाः लक्षणैस्तु फलैः पुनः अपरे समसंपदः इति प्रवदान्ति एतत् न) । अस्यार्थः– सूर्य, विष्णु, इंद्र, यम, चंद्रमा-इनकी तुल्य ये और पांच छाया हैं वे लक्षणों और फलों करिके दूसरे मतवाले इनको समान संपत्तिवाले कहतेहैं–परंतु यह बात नहीं किन्तु इनके पृथक् पृथक् फल हैं ॥ २६ ॥

अथ स्वरः ।

स्निग्धः स्वरोऽनुमोदी निर्ह्रादी खंडितः कलो मन्द्रः ॥
तारः स्वरश्च विपुलो पुंसां संपत्करः सततम् ॥ २७ ॥

अन्वयः–(पुंसां स्निग्धः स्वरः अनुमोदी निर्ह्रादी खंडितः कलः मंद्रः तारः स्वरः विपुलः सततं संपत्करो भवति)। अस्यार्थः-पुरुषोंकी अच्छी जो बोली-है सोई प्रसन्न करतीहै सारसकीसी कुछ कही कुछ न कही मीठी अप्रकट मृदंगकीसी बहुत ऊंची बडी ये सब निरंतर संपत्तिकी करनेवाली हैं ॥२७॥

दुंदुभिवृषभाम्बुदमृदंगशिखिशंबररथांगैः स्यात ॥
यस्य स्वरः समानः स भूपतिर्भवति भोगाढ्यः ॥ २८ ॥

अन्वयः–(यस्य स्वरः दुंदुभिवृषभाम्बुदमृदंगशिखिशंबररथाङ्गैः समानः स्यात्--स भूपतिः भोगाढ्यो भवति)। अस्यार्थः–जिसकी बोली नगारा, बैल, मेघ, मृदंग, मोर, हिरण, चकवा इनकी तुल्य होय सो राजा और भोगी होताहै ॥ २८ ॥

भिन्नः क्षीणः क्षामो विकुष्टो गद्गदस्वरो दीनः ॥
रूक्षो जर्जरितोपि च निःस्वानां निस्वनः प्रायः ॥ २९ ॥

अन्वयः–(निःस्वानां स्वरः भिन्नः क्षीणः क्षामः विकुष्टः गद्गदः दीनः रूक्षः जर्जरितः प्रायः निस्वनः भवति)। अस्यार्थः–दरिद्रियोंकी बोली फूटीटूटी, कुछ कही कुछ न कही बहुत धीरेकी दुबले मनुष्य कीसी, खैंची हुई बडे जोरसे, रुकरुकके, गरीबीसे रूखीसी, बूढोंकीसी ऐसी बोली बहुधा दरिद्रियोंकी होतीहै ॥ २९ ॥

वृककाकोलूकप्लवगोष्ट्रक्रोष्टुरासभवराहैः ॥
तुल्यः स्वरो न शस्तो विशेषतो हि स्वरो दुष्टः ॥ ३० ॥

अन्वयः–(यस्य स्वरः वृककाकोलूकप्लवगोष्ट्रक्रोष्टुरासभवराहैः तुल्यो भवति स न शस्तः विशेषतः स्वरः दुष्टो भवति)। अस्यार्थः–जिसका स्वर,

भेडिया, कौवा, उलूक, बंदर, ऊंट, गीदड, गधा, सूअर इनकीसी तुल्य जो होय तो अच्छा नहीं है—और इनसे अधिक स्वर वाला दुष्ट होताहै ॥३०॥

अथ गंधः ।

गंधो भुवि नराणां प्रजायते नासिकेन्द्रियग्राह्यः ॥
श्वासः स्वेदादिभवो ज्ञेयः स शुभाशुभो द्विविधः ॥ ३१ ॥

अन्वयः--(भुवि नराणां नासिकेन्द्रियग्राह्यः गंधः प्रजायते स्वेदादिभवः गंधः श्वासः स शुभाशुभो द्विविधो ज्ञेयः)। अस्यार्थः—पृथ्वीमें मनुष्योंकी गंध नासिका इंद्रियकरिके लीनी जाय ऐसी जो गंध होय सो—पसीना आदिसे और श्वाससे जो उत्पन्न गन्ध सोई गंध शुभ और अशुभ दो प्रकारकी जानिये ॥ ३१ ॥

कर्पूरागुरुमलयजमृगमदजातीतमालदलगन्धाः ॥
द्विपमदगंधा भूमौ पुरुषाः स्युर्भोगिनः प्रायः ॥ ३२ ॥

अन्वयः--(कर्पूरागुरुमलयजमृगमदजातीतमालदलगंधाः वा द्विपमदगंधा भूमौ प्रायः भोगिनः स्युः) । अस्यार्थः—कपूर, अगर, चंदन कस्तूरी, चमेली, तमाल अर्थात् आमतूसके पत्तेकीसी, वा हाथीकेसे मदकीसी, गंध जिन मनुष्योंकी पृथ्वीमें होय वे मनुष्य बहुधा भोगी होतेहैं ॥ ३२ ॥

मत्स्याण्डपूतिशोणितनिम्बवसाकाकनीडबकगन्धाः ॥
दुर्गन्धाश्च नरास्ते दुर्भगतानिःस्वताभाजः ॥ ३३ ॥

अन्वयः—मत्स्यांडपूतिशोणितनिम्बवसाकाकनीडबकगंधाः ते नराः दुर्गन्धाः प्रायः दुर्भगतानिःस्वताभाजो भवंति) । अस्यार्थः—जिनकी गंध मच्छीके अंडे—सडे—रुधिर—नीम—चरबी—कौवेके अंडे—बगुले—इनके तुल्य होय वे मनुष्य बुरे गंधवाले हैं बहुधा कुरूप और दारिद्रताके भोगनेवाले होतेहैं ॥ ३३ ॥

अथ वर्णः।

गौरः श्यामः कृष्णो वर्णः संभवति देहिनां त्रेधा ॥
आद्यौ द्वावपि शस्तौ शुभो न कृष्णो न संकीर्णः ॥ ३४ ॥

अन्वयार्थौ–(देहिनां वर्णः त्रेधा संभवति) मनुष्योंके शरीरका रंग तीन प्रकारका होताहै जैसे–(गौरः श्यामः कृष्णः द्वौ अपि आद्यौ शस्तौ) गोरा, सांवरा काला जो आदिके दोनों हैं सो अच्छे हैं और (कृष्णः न शुभः वा संकीर्णः शुभो न) काला अच्छा नहींहै और कुछ काला कुछ गोरा यह भी शुभ नहीं है ॥ ३४ ॥

पङ्कजकिञ्जल्कनिभो गौरश्यामः प्रियंगुकुसुमसमः ॥
कृष्णस्तु कज्जलाभः स्निग्धः शुद्धोऽपि नो शस्तः ॥ ३५ ॥

अन्वयार्थौ–(पंकजकिंजल्कनिभः गौरः) कमलके फूलके जीरेके तुल्य तो गोरा और ((प्रियंगुकुसुमसमः श्यामः) धायकेसे फूलके तुल्य सांवरा और (कज्जलाभः समः कृष्णः) काजलके तुल्य है सो काला है और (स्निग्धः शुद्धः अपि कृष्णः नो शस्तः) चिकना चमकना जो काला है सो अच्छा नहीं है ॥ ३५ ॥

अथ सत्त्वम्।

व्यसने वाभ्युदये वा गतशंकाशोकमुकुलितोत्साहम् ॥
उन्मीलनधीरत्वं गंभीरमिह कीर्त्यते सत्त्वम् ॥ ३६ ॥

अन्वयः–(व्यसने वाऽभ्युदये वा गतशंकाशोकमुकुलितोत्साहम् उन्मीलनधीरत्वम् इह सत्त्वं गंभीरं कीर्त्यते)। अस्यार्थः–दुःखमें वा सुखमें वा गईहै शंका–शोक रहित–उत्सवमें प्रसन्नता और धीरज होय सो इस लोकमें ऐसे सत्त्वको गंभीर कहतेहैं ॥ ३६ ॥

एकमपि सत्त्वमेतैः सर्वाणि संति लक्षणैस्तुल्यम् ॥
यस्मिन्कपिमनुजानां न कदाचन दुर्लभा लक्ष्मीः ॥ ३७ ॥

अन्वयार्थौ–(एकमपि सत्त्वमेतैः लक्षणैः तुल्यमस्ति, किंपुनर्यस्मिन्न सर्वाणि कपिमनुजानां मध्ये सत्त्वा दीनि सन्ति)एकही सत्त्व इन सब लक्षणोंके तुल्यहै फिर जिस पुरुष या बंदरके सब सत्त्व और वे लक्षण भी स्थित हैं; (तस्य कदाचन लक्ष्मीः दुर्लभा न) उसे तो कभी लक्ष्मी दुर्लभ नहीं है ३७

त्वचि भोगा मांसे सुखमस्थिषु धनमीक्षणषु सौभाग्यम् ॥
यानं गतौ स्वरे स्यादाज्ञा सत्त्वे पुनः सर्वम् ॥ ३८ ॥

अन्वयः–(त्वचि भोगाः मांसे सुखम् अस्थिषु धनम् ईक्षणेषु सौभाग्यम् गतौ यानम् स्वरे आज्ञा पुनः सत्त्वं सर्वं स्यात्) । अस्यार्थः--त्वचामें जो सत्त्व है सो भोगोंको--मांसमें सुखोंको--हाडोंमें धनको नेत्रोंमें सौभाग्यको–चलनेमें सवारीको--शब्दमें आज्ञाको--फिरभी जो कुछ है सो सब सत्त्वमेंही है ॥ ३८ ॥

सौभाग्यमिव स्त्रीणां पुरुषाणां भूषणं भवति सत्त्वम् ॥
तेन विहीना भुवने भजन्ति परिभवपदं प्रायः ॥ ३९ ॥

अन्वयः–(स्त्रीणां सौभाग्यमिव–पुरुषाणां सत्त्वं भूषणं भवति भुवने तेन विहीनाः प्रायः परिभवपदं भजंति)। अस्यार्थः–स्त्रियोंका सौभाग्य जैसे भूषण है--ऐसेही पुरुषोंका सत्त्व भूषण है--जगत्में जो सत्त्व करिके हीन हैं वे बहुधा निरादर पदको पातेहैं ॥ ३९ ॥

वर्णः शुभो गतेः स्याद्वर्णादपि शुभतरः स्वरः पुंसाम् ॥
अतिशुभतमं स्वरादपि सत्त्वं सत्त्वाधिका धन्याः ॥ ४० ॥

अन्वयः–(पुंसां गतेः वर्णः शुभः, वर्णादपि स्वरः शुभतरः स्यात्-स्वरात् अपि अतिशुभतमं सत्त्वम् तथा--सत्त्वाधिकाः पुरुषाः धन्याः) । अस्यार्थः–पुरुषोंकी गतिसे तो वर्ण शुभ है, वर्णोंसे स्वर अत्यंत उत्तम (अच्छा) है स्वरसेभी उत्तम सत्त्व है–और जिनमें सत्त्व अधिक है वेही पुरुष धन्य हैं ॥ ४० ॥

वक्त्रानुगतं रूपं रूपानुगतं नृणां भवति वित्तम् ॥
वित्तानुगतं सत्त्वं सत्त्वानुगता गुणाः प्रायः ॥ ४१ ॥

अन्वयः–(नृणां वक्त्रानुगतं रूपम्–रूपानुगतं वित्तम्–वित्तानुगतं सत्त्वं–प्रायः सत्त्वानुगताः गुणाः भवंति)। अस्यार्थः–मनुष्योंके मुखके तुल्य तो रूप है और रूपके तुल्य वित्त है और वित्तके तुल्य सत्त्व है और बहुधा सत्त्वके ही तुल्य गुणभी होतेहैं ॥ ४१ ॥

इह सत्त्वमेव मुख्यं निखिलेष्वपि लक्षणेषु मनुजानाम् ॥
सद्भावो भवति पुनश्चिंता शाम्यं समुपयाति ॥ ४२ ॥

अन्वयार्थौ–(इह मनुजानां निखिलेषु लक्षणेषु अपि सत्त्वमेव मुख्यम्) इस लोकमें मनुष्योंके इन सब लक्षणोंमें सत्त्वही लक्षण मुख्य है और (पुनः सद्भावो भवति) इसमें सद्भाव अर्थात् अच्छा विचार होताहै और (चिंता शाम्यं समुपयाति) चिंता शांत होजातीहै ॥ ४२ ॥

नापि तु येषां नमनं मनो विकारं कथंचनाभ्येति ॥
आपद्यपि संपद्यपि ते सत्त्वविभूषिताः पुरुषाः ॥ ४३ ॥

अन्वयार्थौ–(येषां नमनं न तु–आपद्यपि संपद्यपि मनो विकारं कथंच न अभ्येति) जिनका झुकना नहीं है और आपत्तिमें और संपत्तिमें जिनके मनको कभी विकार नहीं होताहै (ते पुरुषाः सत्त्वविभूषिताः भवन्ति) वे पुरुष सत्त्वविभूषित होतेहैं अर्थात् सत्त्व ही जिनके भूषणहै ॥ ४३ ॥

शुभलक्षणमप्येवं बाह्यं न विलोक्यते स्फुटं यस्य ॥
अपि दृश्यते पुनः श्रीस्तस्य तदाऽध्रुवेतिसत्यम् ॥४४॥

अन्वयार्थौ–(यस्य एवं शुभलक्षणं बाह्यमपि स्फुटं न विलोक्यते) जिसके ये शुभलक्षण बाहिरी प्रकट नहीं दीखें (तस्य पुनः श्रीरध्रुवापि दृश्यते-इति सत्यम्) तिसके फिर लक्ष्मी चलायमान दीखतीहै अर्थात् उसके स्थिर नहीं रहे यह बात सत्य है ॥ ४४ ॥

स्थूलैस्तनुभिः परुषैर्मृदुभिः स्वल्पैरथायतैरंगैः ॥
यः सत्त्ववान्स पूज्यस्तत्सकलं गुणाधिकं सत्त्वम् ॥ ४५ ॥

अन्वयार्थौ—(स्थूलैः तनुभिः परुषैः मृदुभिः स्वल्पैः अथ आयतैरंगैः) मोटा, पतला, खरदरा, नरम, छोटा, लंबा, शरीर होय तो इन करके कुछ नहीं (यः सत्त्ववान् स पूज्यः) जो सत्त्ववान् है सोई पूज्य है (तत्सकलं गुणाधिकं सत्त्वं भवति) तिससे सब गुणोंमें अधिक सत्त्वही है ॥ ४५ ॥

शुभलक्षणमंगं यदि सुपूजितः स्यान्नरस्य सत्त्ववतः ॥
तदुभयसंपर्कादिह सौभाग्ये मंजरीभेदः ॥ ४६ ॥

अन्वयार्थौ—(सत्त्ववतः नरस्य यदि अंगं शुभलक्षणं सुपूजितं स्यात्) सत्त्ववाले मनुष्यका यदि अंग शुभलक्षणयुक्त है सोई पूजित है और (तदुभयसंपर्कात् इह सौभाग्ये मंजरीभेदः) उन दोनोंके मिलापसे अर्थात् सत्त्व-अंगके इस लोकमें और भाग्यमें कुछ मंजरीका अर्थात् बालिकासा भेद है ॥ ४६ ॥

इति श्रीमहत्तमश्रीनृसिंहात्मजदुर्लभराजविरचिते सामुद्रतिलका-
परनाम्नि आवर्ताद्यधिकारस्तृतीयः ॥ ३ ॥

संस्थानवर्णगंधावर्ताः सत्त्वं स्वरो गतिश्छाया ॥
तन्नरवन्नारीणामिति लक्षणमष्टधा भवति ॥ १ ॥

अन्वयः—(संस्थानवर्णगंधा आवर्ताः सत्त्वं स्वरः गतिः छाया नारीणामिति नरवत् तत् लक्षणमष्टधा भवति)। अस्यार्थः—आकार, रंग, सुगंध, चक्र, सत्त्व, बोली, चाल, कांति, जैसे मनुष्योंके लक्षण हैं तैसेही स्त्रियोंके भी लक्षण यह आठ प्रकारके होतेहैं ॥ १ ॥

इह देहसन्निवेशः संस्थानं तस्य लक्षणमिदानीम् ॥
आपादतलशिरोन्तं जातस्य शुभाशुभं फलं वक्ष्ये ॥ २ ॥

अन्वयः—(इह देहसंनिवेशः संस्थानम् इदानीं जातस्य आपादतलशिरोन्तं शुभाशुभं फलं वक्ष्ये तस्य लक्षणं ज्ञेयम्)। अस्यार्थः—इस लोकमें शरी-

रका जो आकार है उसीका नाम संस्थान है—अब पुरुषकेसे पाँवसे लेकर शिरतक स्त्रियोंके शुभ वा अशुभ फल कहता हूं—तिसके लक्षण जानने चाहियें ॥ २ ॥

प्रथमं पादस्य तले रेखाश्चक्रादयस्ततोंगुष्ठः ॥
अंगुल्यस्तदनु नखाः पृष्ठं गुल्फद्वयं पार्ष्णिः ॥ ३ ॥

अन्वयः—(प्रथमं पादस्य तले रेखाः ततः चक्रादयः अंगुष्ठः तदनुनखा अंगुल्यः पादपृष्ठं गुल्फद्वयं पार्ष्णिः) ।अस्यार्थः—पहिले तो पाँवके तलुवेकी रेखा तिसके पीछे चक्र आदि और अंगूठा तिसके पीछे नख फिर अंगुली तिस पीछे पाँवकी पीठ और दो टकना और पार्ष्णि नाम पाँवका फावा अर्थात् पंजा ॥ ३ ॥

जंघाद्वयं रोमाणि जानूरूचूचुकगंडयुगलमथो ॥
कटिरथ नितंबबिम्बः स्फिचौ भगं जघनमथ बस्तिः ॥ ४ ॥

अस्यार्थः—(जंघाद्वयम्) पिंडली दोनों । (रोमाणि) बाल, (जानु) घुटनेके ऊपर (ऊरू) जंघा (चूचुक) चूंचीकी नोंकें, (गंडयुगलम् कपोलोंकी दोनों हड्डियाँ (अथो कटिः) और कमर (अथ नितंबबिम्बः) कूलेके मोटेपन । (स्फिचौ) कमरके पिं (भगम्) भग, (जघनम्) कूलेका आगा (अथ बस्तिः) ये पेडू आदि अंग हैं ॥ ४ ॥

नाभिः कुक्षिद्वितयं ततश्च पार्श्वद्वयं तथा जठरम् ॥
मध्यं त्रिवलीरोमावलिसहितं हृदयमथ वक्षः ॥ ५ ॥

अस्यार्थः—(नाभिः) टूंडी, (कुक्षिद्वितयम्) बगलें दोनों, (ततः पार्श्वद्वयम्) तिसकी पांसू दोनों, तथा (जठरम्) और पेट, (मध्यम्) त्रिवली (बीचकी सलवटें) (रोमावलीसहितम्) बालोंकी पंगतिसहित । (हृदयम्) नाभिके ऊपर । (अथ वक्षः) बगल आदि अंग हैं ॥ ५ ॥

उरसिजजत्रुयुगलं तदनु स्कन्धयोर्युग्मम् ॥
अंसद्वयमथ कक्षाद्वितयं भुजयोस्तथा द्वन्द्वम् ॥६॥

अस्यार्थः-(उरसिजम्) चूँची (जत्रुयुगलम्) कंधोंकी हँसली, (तदनु स्कंधयोर्युग्मम्) तिस पीछे दोनों कंधे, (अंसद्वयम्) कंधोंके दोनों भाग, (अथ कक्षद्वितयम्) ये दोनों कांखें, (तथा भुजयोर्द्वन्द्वम्) और दोनों भुजा जानियें६ ॥

मणिबंधपाणियुगलं तस्य च पृष्टं तलं ततो रेखा ॥
अंगुष्ठांगुलयो नखलक्षणमथवानुपूर्विकया वक्ष्ये ॥ ७ ॥

अस्यार्थः-(मणिबंधः) पहुँचा, (पाणियुगलम्) दोनों हाथ, (तस्य पृष्ठम्) तिस हथेलीकी पीठ, (तलम्) हथेली (ततो रेखा) तिसके पीछे रेखा, (अंगुष्ठः) अंगूठा, (अंगुलयः) अंगुली, नख आदि अंगके लक्षण क्रमपूर्वक कहैंगे ॥ ७ ॥

कृकाटिकाऽथ कंठश्चिबुकं कपोलयुगलं च ॥
वक्रमधरोत्तरोष्ठौ दंता जिह्वा ततश्च तालु ॥ ८ ॥

अस्य र्थः-(कृकाटिका) गलेकी घेंटी, (कंठः) गला, (चिबुकम्) ठोडी, (कपोलयुगलम्) दोनों गाल, (वक्रम्) मुख (अधरोत्तरोष्ठौ) ऊपर नीचेके होंठ, (दंताः) दाँत, (जिह्वा) जीभ, (ततश्च तालु) तिसके बाद तालु आदि अंग जानियें ॥ ८ ॥

घंटी हसितं नासा क्षुतमक्षिद्वितयमथ च पक्ष्माणि ॥
भ्रूकर्णयुगललाटं सीमंतं शीर्षमथ केशाः ॥ ९ ॥

अस्यार्थः-(घंटी) तलुदेके ऊपरका भाग (हसितम्) हँसना, (नासा) नाक, (क्षुतम्) छींक, (अक्षिद्वितयम्) आंखें दोनों, (पक्ष्माणि) नेत्रोंकी वरोनी तथा बाफणी । (भ्रूः) भौंह, (कर्णयुगम्) दोनों कान, (ललाटम्) लिलार, (सीमंतम्) बालोंकी मांग, (शीर्षम्) शीस, (अथ केशाः) बाल आदि ये अंग हैं ॥ ९ ॥

अथ पादतलम् ।

पादतलमुष्णमरुणं समांसलं मृदु समं स्निग्धम् ॥
सुप्रतिष्ठितं यासां स्त्रीणां भोगप्रतिष्ठायै ॥ १० ॥

अन्वयः—यासां स्त्रीणाम् पादतलम् उष्णमरुणं समांसलं मृदु समं स्निग्धं सुप्रतिष्ठितं भवति तासां भोगप्रतिष्ठायै भवति । अस्यार्थः—जिन स्त्रियोंका पैरका तलुवा, गरम, लाल, मांससे भरा, नरम, बराबर, चिकना, एकसा बैठा जाय ऐसा होवे तो उन स्त्रियोंके भोग और प्रतिष्ठा अर्थात् बडाईके लिये होता है ॥ १० ॥

रूक्षं खरं विवर्णं चरणतलं भवति भोगनाशाय ॥
असितं दौर्भाग्याय श्वेतं दुःखाय योषाणाम् ॥ ११ ॥

अन्वयार्थौ—(रूक्षं खरं विवर्णं चरणतलं भोगनाशाय भवति) रूखा, खरदरा, बुरे रंगका ऐसा पाँवका तलुवा भोगोंके नाश करनेके लिये होता है और (योषाणां पादतलमसितं दौर्भाग्याय भवति) स्त्रियोंके पांवका तलुवा जो काला होय तो अभाग्यके लिये होताहै और (श्वेतं दुःखाय भवति) जो सफेद होय तो दुःखके लिये होताहै ॥ ११ ॥

शूर्पाकृतिभिः श्वेतैः कुटिलैः स्युर्दुर्भगाश्चरणतलैः ॥
शुष्कैर्निःस्वा विषमैः शोकजुषो दुःखिताऽमृदुभिः ॥ १२ ॥

अन्वयार्थौ—(शूर्पाकृतिभिः श्वेतैः कुटिलैः चरणतलैः नार्यो दुर्भगाः स्युः) जो सूपके आकार और सफेद टेढा ऐसा पाँवका तलुवा होय तो स्त्री कुरूपा और अभागिनी होतीहै—और (शुष्कैः निःस्वाः भवंति) जो सूखा होय तो दरिद्रिणी होय और (विषमैः शोकजुषो भवंति) जो टेढा और ऊंचा नीचा होय तो शोकका सेवन करनेवाली होय और (अमृदुभिः दुखिताः भवंति) जो कडा होय तो दुःखी होतीहैं ॥ १२ ॥

चक्रस्वस्तिकशंखध्वजांकुशच्छत्रमीनमकराद्याः ॥
जायन्ते पादतले यस्याः सा राजपत्नी स्यात् ॥ १३ ॥

अन्वयः—(यस्याः पादतले चक्र–स्वस्तिक–शंख–ध्वजा–अंकुश–छत्र–मीन–मकराद्याः जायन्ते सा राजपत्नी स्यात्) । अस्यार्थः—जिस स्त्रीके पाँवके तलुवेमें चक्र, सांथियां शंख, ध्वजा, अंकुश, छत्र, मछली, मगरको आदि ले करिके ये शुभ रेखा होंय सो शुभ स्त्री राजाकी रानी होतीहै ॥ १३ ॥

चक्रादिचिह्नमध्ये स्यादेकं द्वे बहूनि वा यासाम् ॥
ऐश्वर्यसौख्यमपि वा तासां तदनुमानेन ॥ १४ ॥

अन्वयः—(यासां चक्रादिचिह्नमध्ये एकं स्यात् द्वे वा बहूनि संति तदनुमानेन तासामैश्वर्यसौख्यमपि स्यात्) । अस्यार्थः—जिन स्त्रियोंके चक्रादि चिह्नोंमेंसे एक होय वा दो वा बहुत होंय—तिनके अनुमान करिके तिन्हीं स्त्रियोंको ऐश्वर्य और सौख्य होता है ॥ १४ ॥

ऊर्द्धा रेखांघ्रितले यावन्मध्यांगुलिगता यस्याः ॥
सा लभते पतिमाढ्यं प्रिया पुनर्भवति तस्यापि ॥ १५ ॥

अन्वयः—(यस्याः अंघ्रितले ऊर्द्धा रेखा यावत् मध्यांगुलिगता भवति सा आढ्यं पतिं लभते, पुनः तस्यापि प्रिया भवति) । अस्यार्थः—जिस स्त्रीके पाँवके तलुवेमें जो ऊर्ध्व रेखा जितनी बीचकी अंगुलीतक गई होय सो स्त्री धनवान् पतिको पातीहै और सोई तिसकी प्यारी होतीहै ॥ १५ ॥

श्वशृगालमहिषमूषककाकोलूकाहिकोककरभाद्याः ॥
चरणतले जायन्ते यस्याः सा दुःखमाप्नोति ॥ १६ ॥

अन्वयः—(यस्याः चरणतले श्वशृगालमहिषमूषककाकोलूकाहिकोककरभाद्याः जायन्ते सा दुःखमाप्नोति) । अस्यार्थः—जिस स्त्रीके पाँवके तलुवेमें कुत्ता, गेदडी, भैंसा, चूहा, कौवा, उल्लू, सर्प, भेड़िया, ऊँट आदिके चिह्न होंय सो स्त्री दुःख पाती है ॥ १६ ॥

अथांगुष्ठः ।

मांसोपचितोंगुष्ठः समुन्नतो वर्तुलः शुभो यः स्यात् ॥
ह्रस्वश्चिपिटो वक्रः कुलक्षयाय ध्रुवं स्त्रीणाम् ॥ १७ ॥

अन्वयः-(यस्याः यः पादांगुष्ठः मांसोपचितः समुन्नतः वर्तुलः स शुभः तथा-ह्रस्वः चिपिटः वक्रः स्त्रीणां ध्रुवं कुलक्षयाय भवति) । अस्यार्थः-जिस स्त्रीका जो पाँवका अँगूठा मांससे भरा ऊंचा गोल ऐसा होय सो शुभ है और छोटा चिपटा टेढा होय तो स्त्रियोंका ऐसा अँगूठा कुलका नाश करनेवाला होताहै ॥ १७ ॥

वैधव्यं विपुलेन द्वेष्यत्वं स्वल्पवर्त्तुले स्त्रीणाम् ॥
रमणादृतायमाना पुनरंगुष्ठेनातिदीर्घेण ॥ १८ ॥

अन्वयार्थौ-(स्त्रीणां विपुलेन अंगुष्ठेन वैधव्यं स्यात्) स्त्रियोंके चौड़े अँगूठेसे विधवापन होताहै और (स्वल्पवर्तुलेन अंगुष्ठेन द्वेष्यत्वं स्यात) थोडे गोल अँगूठेसे वैरभाव होताहै और (अतिदीर्घेण अंगुष्ठेन रमणादृतायमाना भवति) बहुत लंबे अंगूठेसे स्त्री पतिसे आदर पानेवाली होतीहै ॥ १८ ॥

अथांगुल्यः ।

मृदवोंगुलयः शोणाः पादाम्बुजस्य च कोमलदलानि ॥
सरला घनाः सुवृत्ताः समुन्नता भोगलाभाय ॥ १९ ॥

अन्वयः-(पादांबुजस्य अंगुलयः मृदवः शोणाःअम्बुजस्य कोमलदलानि इव सरलाः घनाः सुवृत्ताःसमुन्नताः भोगलाभाय भवंति)। अस्यार्थः-पांवकी अंगुलियें नरम, लाल कमलकी पत्तियोंकीसी नरम और सूधी, सघन आस पास गोल, उँचाई लिये ऐसी भोगके लाभके अर्थ होतीहैं ॥ १९ ॥

वितरंति प्रौढभुग्ना दौर्भाग्यत्वं हि किंकरीत्वं च ॥
पृथवः स्थूलाः दुःखं विरला रूक्षाः पुनर्नैःस्व्यम् ॥२०॥

अन्वयार्थौ-(प्रौढभुग्नाः अंगुल्यः दौर्भाग्यत्वं वितरंति) बहुत टेढी अंगुली कुरूपको देतीहैं और (पृथवः अंगुल्यः किङ्करीत्वं वितरंति) फैलीहुई चौड़ी

अंगुली दासीपनको देतीहैं और (स्थूलाःअंगुल्यः दुःखं वितरंति) मोटी अंगुली दुःखको देतीहैं और (विरलाः रूक्षाः अंगुल्यः पुनः नैःस्व्यं वितरंति) छितरी और रूखी अंगुली फिर दरिद्रपनको देती हैं ॥ २० ॥

पूर्वं वृत्ता यस्यास्तनवोंगुलयः परस्परारूढाः ॥
हत्वा बहूनपि पतीन् सा दासी जायते नियतम् ॥ २१ ॥

अन्वयार्थौ–(यस्याः अंगुल्यः पूर्वं वृत्ताः तनवः परस्परारूढाः भवंति) जिस स्त्रीकी अंगुली पहले गोल फिर पतली एकके ऊपर एक चढी हुई होय (सा बहून् अपि पतीन् हत्वा नियतं दासी जायते) सो स्त्री बहुत पतिनको मारिके निश्चय करके दासी होतीहै ॥ २१ ॥

यस्याः पथि प्रयांत्या रेणुकणाः क्षितितलात्समुच्छलंति ॥
सा च कदापि न शस्ता कुरुते कुटिला विनाशं च ॥ २२ ॥

अन्वयार्थौ–(पथि प्रयांत्या यस्याः क्षितितलात् रेणुकणाः समुच्छलंति) जिसके मार्ग चलनेसे धरतीसे धूलके कण उछलें (सा कदापि न शस्ता) सो स्त्री कभी अच्छी नहीं और च पुनः सा कुटिला विनाशं कुरुते) सो खोटी स्त्री नाश करती है ॥ २२ ॥

यांत्या नियतं यस्या न स्पृशति कनिष्ठिकांगुली भूमिम् ॥
सा हत्वा पतिमाद्यं रहो रमते द्वितीयेन ॥ २३ ॥

अन्वयार्थौ–(यांत्या यस्याः कनिष्ठिकांगुली नियतं भूमिं न स्पृशति) जिस स्त्रीकी चलती हुई अंगुली निश्चय पृथ्वीको नहीं छुवे (सा आद्यं पतिं हत्वा रहः द्वितीयेन रमते) सो स्त्री पहले पतिको मारिके एकांतमें दूसरे पतिके साथ भोगविलास करतीहै ॥ २३ ॥

यस्या न स्पृशति भूतलमनामिका सा पतिद्वयं हन्ति ॥
अतिहीनायां तस्यां नित्यं कलहप्रिया सा च ॥ २४ ॥

अन्वयार्थौ–(यस्याः अनामिका भूतलं न स्पृशति) जिस स्त्रीकी अनामिका अंगुली चलतेमें धरतीसे न लगे (सा पतिद्वयं हन्ति) सो दो

पतिको मारतीहै (तस्यामतिहीनायां सत्यां सा नित्यं कलहप्रिया भवति) तिसके अत्यंत छोटे होनेसे सो स्त्री नित्यही कलहकी प्यारी होतीहै ॥२४॥

हीना मध्या यस्याः सा योषित्पौरुषं करोति सततम् ॥
अस्पृष्टायां भुवि तस्यां मारयति पुनः पतित्रितयम् ॥२५॥

अन्वयार्थौ-(यस्याः मध्या हीना भवति सा योषित् सततं पौरुषं करोति) जिस स्त्रीके पांवकी बीचकी अंगुली छोटी होय सो स्त्री निरंतर पराक्रमको करतीहै (पुनः भुवि तस्यामस्पृष्टायां सा योषित् पतित्रितयं मारयति) और जो धरतीको बीचकी अंगुली न छुए सो स्त्री तीन पतिको मारतीहै ॥ २५ ॥

अंगुष्ठादधिका स्याद्यस्याः पादप्रदेशिनी नियतम् ॥
सा भवति दुश्चरित्रा कन्यैव च कोऽत्र सन्देहः ॥ २६ ॥

अन्वयार्थौ-(यस्याः पादप्रदेशिनी नियतमंगुष्ठात् अधिका स्यात्) जिस स्त्रीके पांवके अँगूठेके पासकी अँगुली अंगूठेसे निश्चय बडी होय (सा कन्या एव दुश्चरित्रा भवति अत्र कः संदेहः) सो कन्याहीपनमें व्यभिचारणी होतीहै-इसमें क्या संदेह है ॥ २६ ॥

अथ नखलक्षणम् ।

आताम्ररुचयः स्निग्धाः समुन्नताः शुभा नखराः ॥
वृत्ता मसृणाः स्त्रीणां न पुनः शस्ता विपर्यस्ताः ॥ २७ ॥

अन्वयार्थौ-(आताम्ररुचयः स्निग्धाः समुन्नताः वृत्ताः मसृणाः स्त्रीणां नखराः शुभाः) कुछ लाल है रंग जिनके अच्छे चमकदार ऊंचे गोल चिकने ऐसे स्त्रियोंके नख अच्छे हैं और पुनः विपर्यस्ताः न शस्ताः) इससे विपरीत जो होयँ तो अच्छे नहीं हैं ॥ २७ ॥

अथ पृष्ठलक्षणम् ।

कमठोन्नतेन मृदुना चेच्छिरारहितेन पीनेन ॥
राज्ञीत्वं पृष्ठेन न स्त्रीणां स्यात्पादपीठेन ॥ २८ ॥

अन्वयः–(कमठोन्नतेन मृदुना चेत् शिरारहितेन पीनेन एतादृशेन पृष्ठेन स्त्रीणां मध्ये राज्ञीत्वं स्यात्–पादपीठेन पृष्ठेन न) । अस्यार्थः–कछुवे-कीसी ऊंची मुलायम और नसें नहीं निकली होयँ और मोटी ऐसी पीठसे स्त्रियोंके बीचमें स्त्री रानी होतीहै और–चौकीकीसी भाँतिसे पीठ होय तो रानीपन नहीं होय ॥ २८ ॥

रोमान्वितेन दासी निर्मांसेनाधमा भवति नारी ॥
मध्यनतेन दरिद्रा दौर्भाग्यवती शिरालेन ॥ २९ ॥

अन्वयार्थौ–(रोमान्वितेन पृष्ठेन दासी भवति) जिसकी पीठपर रोम बहुत होंय वह दासी होय और (निर्मांसेन पृष्ठेन नारी अधमा भवति) जो मांसरहित पीठ होय तो वह स्त्री नीच होती है और (मध्यनतेन पृष्ठेन दरिद्रा भवति) जो बीचमें नीची पीठ होय तो दरिद्रिणी होय औ (शिरालेन पृष्ठेन नारी दौर्भाग्यवती भवति) जिसमें नसें निकली हुई चमकती होयँ ऐसी पीठवाली स्त्री अभागिनी होतीहै ॥ २९ ॥

अथ गुल्फलक्षणम् ।

गूढौ सुखाय गुल्फौ वर्तुलौ शिरारहितावशिथिलौ ॥
विषमौ विकटौ ख्यातौ गुल्फौ दौर्भाग्याय नियतम् ॥ ३० ॥

अन्वयार्थौ–(गूढौ वर्तुलौ शिरारहितौ अशिथिलौ एतादृशौ गुल्फौ सुखाय भवतः) मांससे दबेहुए गोलाई लिये नसें न प्रकट होयँ जिसमें और ढीले नहीं कड़े होंय तो ऐसी टँघनेवाली स्त्री सुखी रहतीहै और (विषमौ विकटौ ख्यातौ एतादृशौ गुल्फौ नियतं दौर्भाग्याय भवतः) जो ऊंचे नीचे कडे प्रकट होंय तो ऐसी टँघनेवाली स्त्री निश्चय अभागिनी रहतीहै ॥ ३० ॥

अथ पार्ष्णिलक्षणम् ।

सौख्यवती समपार्ष्णिः पृथुपार्ष्णिर्दुर्भगा नारी ॥
उन्नतपार्ष्णिः कुलटा दुःखवती दीर्घपार्ष्णिः स्यात् ॥ ३१ ॥

अन्वयार्थौ-(समपार्ष्णिः नारी सौख्यवती स्यात्) बराबर पाँवके फावेवाली स्त्री सुखी रहे और (पृथुपार्ष्णिः नारी दुर्भगा स्यात्) जो चौड़े छितरे पाँवके फावेवाली स्त्री होय वह कुरूपिणी होतीहै और (उन्नतपार्ष्णिः नारी कुलटा स्यात) ऊंचे पाँवके फावेवाली स्त्री व्यभिचारिणी अर्थात् घर घर फिरनेवाली होतीहै और (दीर्घपार्ष्णिः नारी दुःखवती स्यात) लंबे पाँवके फावेवाली स्त्री दुःखी रहतीहै ॥ ३१ ॥

प्रथमदशी पूर्णा।

अथ जंघालक्षणम्।

स्निग्धे रोमविहीने यस्याः क्रमवर्तुले समे विशिरे ॥
पादाम्बुजमाले इव जंघे सा भवति नृपपत्नी ॥ ३२ ॥

अन्वयः--(यस्याः जंघे स्निग्धे रोमविहीने क्रमवर्तुले समे विशिरे पादांबुजमाले इव सा नृपपत्नी भवति)। अस्यार्थः-जिस स्त्रीकी पिंडली अच्छी चिकनी रोमरहित, क्रमसे गोल बराबर नसें न चमकतीहों और चरणकमलकीसी माला होय सो राजाकी रानी होतीहै ॥ ३२ ॥

शुष्के पृथू विशाले शिरान्विते स्थूलपिंडके यस्याः ॥
जंघे मांसोपचिते श्लथजानू पांशुला सा स्यात् ॥ ३३ ॥

अन्वयः--(यस्याः जंघे पृथू विशाले शिरान्विते शुष्के मांसोपचिते श्लथजानू स्थूलपिण्डके भवतः सा पांशुला स्यात)। अस्यार्थः-(जिस स्त्रीकी पिंडली चोडी बडी, नसें चमकती हुई सूखी थोडे मांसकी ढीले हैं घुटनेके ऊपरके भाग जिनमें और मोटे पिंड होंय सो स्त्री व्यभिचारिणी होतीहै ३३॥

जंघे खररोमे वै वायसजंघोपमेऽथवा यस्याः ॥
मारयति पतिं यदि वा प्रायः सा स्वैरिणी भवति ॥ ३४ ॥

अन्वयार्थौ-(यस्याः जंघे खररोमे वा वायसजंघोपमे द्वे भवतः सा पतिं मारयति) जिस स्त्रीकी पिंडली खरदरे रोमवाली अथवा कौवेकी पिंड-

लीके तुल्य जो निश्चय करके होयँ सो स्त्री पतिको मारतीहै और (यदि वा प्रायः स्वैरिणी भवति) जो बहुधा करके व्यभिचारिणी होतीहै ॥ ३४ ॥

एकैकमेव भूपतिपत्नीनां रोमकूपेषु रोम स्यात् ॥
सामान्यानामथवा द्वित्र्यादीनि तथैव विधवानाम् ॥ ३५ ॥

अन्वयार्थौ-(भूपतिपत्नीनां रोमकूपेषु एकैकमेव रोम स्यात्) राजाओंकी रानीके बालोंके छेदोंमें एकही एक रोम होताहै और (सामन्यानाम् अथवा विधवानां रोमकूपेषु तथैव द्वित्र्यादीनि रोमाणि भवन्ति) जो सामान्य और स्त्रियोंके अथवा विधवाओंके उन्हीं बालोंके छेदोंमें दो तीन आदि करके रोम होतेहैं ॥ ३५ ॥

अथ जानुकथनम् ।

यस्या जानुयुगं स्यादनुल्वणं पिशितमग्नमतिवृत्तम् ॥
सा लक्ष्मीरिव नियतं सौभाग्यसमान्विता वनिता ॥ ३६ ॥

अन्वयार्थौ-(यस्याः जानुयुगम् अनुल्वणं पिशितमग्नमतिवृत्तं स्यात्) जिस स्त्रीके दोनों घुटनोंके ऊपरके भाग बडे और बुरे न होयँ और मांसमें गढ और बहुत गोल होयँ (सा वनिता नियतं सौभाग्यसमान्विता लक्ष्मीरिव भवति) सो स्त्री निश्चय करके सौभाग्य युक्त लक्ष्मीकी भांति होतीहै ॥ ३६ ॥

निर्मांसैः स्वैरिण्यो विविधाभैः सदाध्वगा नार्यः ॥
विश्लिष्टैर्धनहीना जायन्ते जानुभिः प्रायः ॥ ३७ ॥

अन्वयार्थौ-(निर्मांसैः जानुभिः नार्यः स्वैरिण्यो भवन्ति) थोडे मांसवाली जानु करके स्त्री व्यभिचारिणी होतीहै और (विविधाभैः नार्यः सदाऽध्वगा भवन्ति) अनेक सूरतकी जानु करके स्त्री सदा मार्ग चलनेवाली होतीहै और (विश्लिष्टैः जानुभिः नार्यः प्रायः धनहीनाः जायन्ते) जो छितरीसी जानुवाली होयँ वे स्त्री बहुधा धनहीन होतीहैं ॥ ३७ ॥

अथोरुकथनम् ।

मदनगृहस्तंभौ यौ कदलीकाण्डोपमावूरू ॥
यस्याः करिकरवृत्तावरोमशौ भूपपत्नी स्यात् ॥ ३८ ॥

अन्वयः-(यस्याः यौ ऊरू मदनगृहस्तंभौ कदलीकांडोपमौ करिकरवृत्तौ अरोमशौ सा भूपपत्नी स्यात्) । अस्यार्थः-जिस स्त्रीकी जो दोनों जाँघें कामदेवके घरके खंभे-केलेके वृक्षके तुल्य और हाथीकी सूंडकी बराबर गोल और रोमरहित होयँ सो राजाकी स्त्री अर्थात् रानी होतीहैं ॥ ३८ ॥

मांसोपचितैर्विशिरैः कलभकरोपमैररोमभिर्मृदुभिः ॥
आसादयन्ति सततं मदनक्रीडासुखं नार्यः ॥ ३९ ॥

अन्वयः-(नार्यः मांसोपचितैः विशिरैः अरोमभिः घनैः मृदुभिः कलभकरोपमैः ऊरुभिः सततं मदनक्रीडासुखम् आसादयन्ति) । अस्यार्थः-जिन स्त्रियोंकी दोनों जाँघें मांससे भरी हुई नसें चमकती न होयँ रोमरहित होंय मोटी कोमल हाथीकी सूंडके तुल्य होयँ तो ऐसी जाँघोंसे स्त्री निरंतर कामदेवके सुखको भोगती है ॥ ३९ ॥

चलमांसैर्दौर्भाग्यं वैधव्यं लोमशैः खरैर्नैःस्व्यम् ॥
मध्यक्षुद्रैर्दुःखं तनुभिर्वधमूरुभिर्याति ॥ ४० ॥

अन्वयार्थौ-(चलमांसैः ऊरुभिः नारी दौर्भाग्यं याति) मांससे ढीली दोनों जाँघें जो स्त्रीकी होयँ तो अभागिनी होतीहै और (लोमशैः खरैरूरुभिः नारी नैःस्व्यं वा वैधव्यं याति) रोमों सहित खादरी जाँघोंसे स्त्री दारिद्रिणी और विधवा होती है और (मध्यक्षुद्रैः तनुभिरूरुभिः नारी दुःखं तथा वधं याति) बीचमें छोटी और पतली जाँघों करके स्त्री दुःख और मरणको पातीहै ॥ ४० ॥

इति द्वितीयदशी पूर्णा ।

अथ कटिलक्षणकथनम् ।

दक्षा चतुरन्वितविंशत्यंगुलविनता कटिः समा कठिना ॥
उन्नतनितम्बबिम्बा चतुरस्रा शोभना स्त्रीणाम् ॥ ४१ ॥

अन्वयः-(स्त्रीणां कटिः चतुरन्वितविंशत्यंगुलविनता समा कठिना उन्नतनितम्बबिम्बा चतुरस्रा शोभना दक्षा भवति)। अस्यार्थः-स्त्रियोंकी कमर जो २४ अंगुलकी झुकीहुई बराबर कडी और ऊंचे हैं कूले जिसके और चौकोर ऐसी कमर शोभायमान अच्छी होतीहै ॥ ४१ ॥

विनता दीर्घा चिपिटा निर्मांसा संकटा कटिर्विकटा ॥
ह्रस्वा रोमयुता या सा वनितादौर्भाग्यदुःखकरी ॥ ४२ ॥

अन्वयः-(स्त्रीणां या कटिः विनता दीर्घा चिपिटा निर्मांसा संकटा विकटा ह्रस्वा रोमयुता स्यात्, सा वनितादौर्भाग्यदुःखकरी भवति) अस्यार्थः-स्त्रियोंकी कमर जो बहुत झुकी हुई और लंबी चपटी मांसरहित सूखी भयंकर बुरी छोटी रोमयुक्त होय सो कमर स्त्रियोंकी अभाग्य और दुःखकी करनेवाली होतीहै ॥ ४२ ॥

अथ नितम्बबिम्बलक्षणम् ।

सुदृशां नितम्बबिम्बः समुन्नतो मांसलः पृथुः पीनः ॥
स्मरभूपस्य सुवर्णक्रीडाचुलुक इव रतिनिमित्तम् ॥४३॥

अन्वयः-(सुदृशां नितम्बबिंबः समुन्नतः मांसलः पृथुः पीनः स्यात् रतिनिमित्तं स्मरभूपस्य सुवर्णक्रीडाचुलुक इव)। अस्यार्थः-स्त्रियोंके कूले बराबर ऊंचे मांससे भरे चौड़े मोटे होयँ तो रति करनेके निमित्त कामदेव राजाके खेलनेका मानों सुवर्णका बाजा है ॥ ४३ ॥

विकटश्चिपिटो नतिमान्निर्मांसो रोमशः खरः शुष्कः ॥
कुरुते नितम्बफलको दरिद्रतां दुःखदौर्भाग्यम् ॥ ४४ ॥

अन्वयः-(विकटः चिपिटः नतिमान् निर्मांसः रोमशः खरः शुष्कः नितम्बफलकः दरिद्रतां च दुःखदौर्भाग्यं कुरुते)। अस्यार्थः--भयानक चिपटे

झुके हुए नीचे थोडे मांसके रोमवाले खरदरे सूखे ऐसे जो कूले होंय तो दरिद्री वा दुःख वा अभाग्यको करतेहैं ॥ ४४ ॥

अथ स्फिक्कथनम् ।

बलिभिर्मुक्तौ पीनौ कपित्थफलवर्तुलौ स्फिचौ नार्याः ॥
मृदुलौ घनमांसयुतौ रतिसौख्यं वितरतः सततम् ॥ ४५ ॥

अन्वयः-(बलिभिर्मुक्तौ पीनौ कपित्थफलवर्तुलौ मृदुलौ घनमांसयुतौ नार्याः स्फिचौ सततं रतिसौख्यं वितरतः) । अस्यार्थः--विना सलवटके कडे मांसके कैथाकेसे फलके तुल्य गोल कोमल बहुत मांसयुक्त जो स्त्रीकी कमरके दोनों ओरके मांसके पिंड होंय तो निरंतर रतिके सुखको देतेहैं ॥ ४५ ॥

परुषं रूक्षं चिपिटं स्फिग्युग्मं मांसरहितं न शुभम् ॥
तदपि च बिम्बमानं धत्ते वैधव्यमचिरेण ॥ ४६ ॥

अन्वयार्थौ-(परुषं रूक्षं चिपिटं मांसरहितं स्फिग्युग्मं शुभं न) खरदरे रूखे चिपटे मांसरहित जो कमरके दोनों ओरके पिंड होंय तो शुभ नहीं हैं और (तदपि स्फिग्युग्मं विलम्बमानं भवति तर्हि अचिरेण वैधव्यं धत्ते) जो वेही दोनों ओरके मांसके पिंड लम्बे और लटकते ढीले होंय तो शीघ्रही विधवापनको करतेहैं ॥ ४६ ॥

प्राक् सव्येन निषीदति पदेन सा सुखं सदा लभते ॥
या पुनरपसव्येन स्फुटं सा कष्टमेणाक्षी ॥ ४७ ॥

अन्वयार्थौ-(या एणाक्षी प्राक् सव्येन पदेन निषीदति सा सदा सुखं लभते) जो स्त्री पहले बायें पगकरके बैठे सो सदा सुखको पातीहै और (या अपसव्येन निषीदति सा स्फुटं कष्टं लभते) जो पहले दाहिने पगसे बैठै सो कष्ट दुःखको पातीहै ॥ ४७ ॥

अथ भगलक्षणम् ।

अश्वत्थदलाकारः कुंभिस्कंधोपमो भगः पृथुलः ॥
पूर्णेन्दुबिंबतुल्यः कच्छपपृष्ठः शुभः सुदृशाम् ॥ ४८ ॥

अन्वयः--(अश्वत्थदलाकारः कुंभिस्कंधोपमः पृथुलः पूर्णेन्दुबिम्बतुल्यः कच्छपपृष्ठः एतादृशः सुदृशां भगः शुभः) । अस्यार्थः--पीपलके पत्तेके आकार--और हाथीके कंधेके तुल्य चौड़ी मांसल चंद्रमाके बिम्बके तुल्य कछुवेकी पीठकीसी ऐसी स्त्रियोंकी योनि होय तो शुभ है अच्छी है ॥ ४८ ॥

स्निग्धो मृदुकृशरोमा मांसोपचितो भगोभवेद्यस्याः ॥
सा पुत्रवती नियतं लभते रतिसौख्यसौभाग्यम् ॥ ४९ ॥

अन्वयार्थौ--(यस्याः भगः स्निग्धः मृदुकृशरोमा मांसोपचितः भवेत्) जिस स्त्रीकी योनि अच्छी चिकनी नरम और थोड़े हैं रोम जिस-पर--मांससे भरीहुई होय (सा पुत्रवती नियतं वा रतिसौख्यसौभाग्यं लभते) सो पुत्रवती निश्चय होय और रतिके सुख और सौभाग्यको पातीहै ॥ ४९ ॥

नियतं भगोङ्गनायाः प्रसूयते दक्षिणोन्नतः पुत्रान् ॥
वामोन्नतस्तु कन्या जगति समुद्रस्य वचनमिदम् ॥ ५० ॥

अन्वयार्थौ--(यस्याः अंगनायाः भगः नियतं दक्षिणोन्नतः स्यात्) सा पुत्रान् प्रसूयते) जिस स्त्रीकी योनि निश्चय दाहिनी ओरको ऊंची होय सो पुत्रोंको उत्पन्न करै है और (वामोन्नतः भगः कन्याः प्रसूयते) जो बाँई ओरकी योनि ऊंची होय तो कन्याओंको उत्पन्न करे (जगति इ समुद्रस्य वचनम्) लोकमें यह समुद्रका वचन है ॥ ५० ॥

यस्याः स्याच्चतुरस्रा कच्छपपृष्ठा स्थिरा श्रोणी ॥
सा वै प्रबलान्पुरुषान्रोहिणी भूरिव रमणी सूते ॥ ५१ ॥

अन्वयार्थौ--(यस्याः श्रोणी चतुरस्रा कच्छपपृष्ठा स्थिरा स्यात्) स्त्रीकी योनि चौकोन और कछुवेकी पीठके तुल्य उठी हुई कड़ी होय रमणी रोहिणी भूरिव वै प्रबलान् पुरुषान् सूते) सो स्त्री रोहिणी पृथ्वीकी भाँति प्रबल पुरुषोंको उत्पन्न करै है ॥ ५१ ॥

बहुलोर्द्ध्वकृष्णरोमा सुश्लिष्टः संहितो भगः शस्तः ॥
गूढमणिश्चिंतामणिरिव भुवि विततं धनं तनुते ॥ ५२ ॥

अन्वयार्थौ–(बहुलोर्द्ध्वकृष्णरोमा सुश्लिष्टः संहितः गूढमणिः भगः शस्तः) बहुत हैं ऊंचे काले रोम जिसपै और मिली हुई अच्छी बनावटकी और छिपी है मणि कहिये टोंटनी जिसकी ऐसी योनि अच्छी होतीहै (सः भगः भुवि चिंतामणिरिव विततं धनं तनुते) वही योनि पृथ्वीमें चिंतामणिकी भाँति बहुत धनको पैदा करतीहै ॥ ५२ ॥

विस्तीर्णोऽम्बुजवर्णो मृदुतनुरोमाल्पनासिकस्तुङ्गः ॥
द्विरदस्कन्धसमः स्यात्स्त्रीणां षडमी भगाः सुभगाः ॥ ५३ ॥

अन्वयः–(विस्तीर्णः अम्बुजवर्णः मृदुतनुरोमा अल्पनासिकः तुङ्गः द्विरदस्कन्धसमः स्त्रीणाममी षट् भगाः सुभगाः)। अस्यार्थः–चौड़ी और कमलके रंग, नरम, थोड़े रोमवाली और छोटी है नासिका जिसकी, ऊंची, हाथीके कंधेकी समान, स्त्रियोंकी ऐसी यह छः योनि अच्छी होतीहैं ॥ ५३ ॥

रुचिरोऽत्युष्णः सुघनो गोजिह्वाकर्कशोऽथवा मृदुलः ॥
अत्यन्तसुसंवृत्तः सुगंधिश्च सप्त भगा वर्द्धयंति रतिम् ॥ ५४ ॥

अन्वयः–(रुचिरः अत्युष्णः सुघनः गोजिह्वाकर्कशः मृदुलः अत्यंतसुसंवृत्तः सुगंधिरेते सप्त भगाः रतिं वर्द्धयन्ति) अस्यार्थः–अच्छी, बहुत गरम, कड़ी, गायकी जीभकीसी खरदरी, नरम, बहुत गोल, अच्छी गंधवाली–ये सात प्रकारकी योनि सुखभोगको बढ़ातीहैं ॥ ॥ ५४ ॥

विस्पष्टः स्थूलमणिः संकीर्णः खर्पराकृतिः स्त्रीणाम् ॥
खरकुटिलः खररोमा मांसविहीनो भगो न शुभः ॥ ५५ ॥

अन्वयः–(विस्पष्टः स्थूलमणिः संकीर्णः खर्पराकृतिः खरकुटिलः खररोमा मांसविहीनः स्त्रीणामीदृशो भगः न शुभः)। अस्यार्थः–दीखैहै मोटी मणि जिसमें, सँकड़ी, खपरेके आकार, खरदरी टेढ़ी, खरदरे मोटे बाल, मांसरहित सूखीसी–ऐसी स्त्रियोंकी योनि शुभ नहीं है ॥ ५५ ॥

१ विपुलम्।

चुल्लीकोटरतुल्यस्तिलपुष्पनिभः कुरंगखुररूपः ॥
विश्वप्रेष्यां निःस्वां प्रकुर्वते त्रयो भगाः स्त्रियं नूनम् ॥ ५६ ॥

अन्वयः-(चुल्लीकोटरतुल्यः तिलपुष्पनिभः कुरंगखुररूपः एते त्रयो भगाः स्त्रियं नूनं विश्वप्रेष्यां निःस्वां प्रकुर्वते)।अस्यार्थः-चुल्हेसी, वृक्षकी खोडरके तुल्य और तिलके फूलके तुल्य और हिरणकी खुरीके आकार एसी तीन प्रकारकी योनि स्त्रीको निश्चय पूरी टहलनी चलनेवाली और दरिद्रिणी करतीहैं ५६ ॥

विसृतमुखो नारीणामुलूखलाभो भगः सुदुर्गन्धः ॥
कुञ्जररोमा सततं कुरुते दुःशैल्यदौर्भाग्यम् ॥ ५७ ॥

अन्वयः-(विसृतमुखः उलूखलाभः सुदुर्गन्धः कुञ्जररोमा एतादृशः नारीणां भगः सततं दुःशैल्यदौर्भाग्यं कुरुते) । अस्यार्थः-खुले हुए मुखकी ओखलीसी बुरी गंधवाली हाथीकेसे रोम होंय तो एसी स्त्रियोंकी योनि निरंतर दुःख और अभाग्यको करे हैं ॥ ५७ ॥

श्रोणीबिम्बेनालं सल्कीचकनवदलसमाश्रिया नारी ॥
सुखिता प्रायः प्रथमं पश्चात्सा दुःखिता भवति ॥ ५८ ॥

अन्वयः-(सल्कीचकनवदलसमाश्रिया श्रोणीबिम्बेन नारी प्रायः प्रथममलं सुखिता भवेत् सा पश्चाद्दुःखिता भवति) । अस्यार्थः-बाँसके नवीन पत्तेकीसी है शोभा जिसकी ऐसी योनि करके स्त्री बहुधा पहले तो सुख पाती है-और पीछे दुःखको प्राप्त होतीहै ॥ ५८ ॥

शंखावर्त्तसमाना श्रोणी प्रायः प्रजायते यस्याः ॥
धारयति सा न गर्भं निषेव्यमाणा च दुःखकरा ॥ ५९ ॥

अन्वयार्थौ-(यस्याः श्रोणी शंखावर्त्तसमाना प्रायः प्रजायते सा गर्भं न धारयति) जिस स्त्रीकी योनि शंखके आकार होय सो गर्भको नहीं धारण करै है और (सा निषेव्यमाणा सती दुःखकरा भवेत्) वह सेवन करी हुई भी दुःखकी करनेवाली होतीहै ॥ ५९ ॥

वेतसपर्णसमानः संकीर्णः श्रोणिबिम्ब इव यस्याः ॥
असती सा न कदाचन कल्याणपरंपरा नियतम् ॥ ६० ॥

अन्वयार्थौ–(यस्याः संकीर्णः श्रोणिबिम्बो वेतसपर्णसमान इव भवेत) जिस स्त्रीकी सँकडी योनि बेंतके पत्तेकी समान होय (सा असती) सो स्त्री अच्छी नहीं होगी और (कदाचन नियतं कल्याणपरंपरा न) कभीभी निश्चय करके भलाईकी करनेवाली नहींहै ॥ ६० ॥

तनुरेताः खररोमा संक्षिप्तो दीर्घनासिको विकटः ॥
विवृतास्यो नारीणां जगति भगा दुर्भगाः षडमी ॥ ६१ ॥

अन्वयार्थौ–(नारीणां जगति अमी षड् भगाः दुर्भगाः भवन्ति) स्त्रियोंकी लोकमें ये छः प्रकारकी योनि बुरी होतीहैं (तनुरेताः खररोमा संक्षिप्तः दीर्घनासिकः विकटः विवृतास्यः न शस्तः) थोडे वीर्यवाली खरदरे रोमवाली बहुत छोटी बडी नाकवाली और भयंकर खुले मुखवाली ये अच्छी नहीं हैं ॥ ६१ ॥

वलिसहितोद्भवसहितो प्रलम्बमानोथ शीतलः शिथिलः ॥
नीचमुखोप्यथ पृथुलः सप्तामी रतिषु दुःखकृताः ॥ ६२ ॥

अन्वयः–(वलिसहितः उद्भवसहितः प्रलम्बमानः शीतलः शिथिलः नीचमुखः पृथुलः रतिषु अमी सप्त भगाः दुःखकृताः भवंति)। अस्यार्थः– मलवटेंवाली कुछ दिनोंके गर्भवाली लंबी ठंढी पिलपिली लटकी हुई ढीली चौडी मोटी भोगमें ये ७ प्रकारकी योनि दुःखके करनेवालीहैं ॥ ६२ ॥

जघने भगस्य भालं विस्तीर्णं मांसलं समुत्तुंगम् ॥
तनुकृष्णमृदुलरोम प्रदक्षिणावर्त्तमिह शस्तम् ॥ ६३ ॥

अन्वयः–(इह जघने भगस्य भालमेतादृशं शस्तम् । विस्तीर्णम्, मांसलम् समुत्तुंगम् तनुकृष्णमृदुलरोम प्रदक्षिणावर्त्तम्) । अस्यार्थः–इस लोकमें पेडूके ऊपरी भागकी जो भग है उसका जो भाल ऐसा होय तो अच्छाहै लंबा

चौडा, मांसका भरा गुदगुदा, ऊंचा, थोडे काले नरम रोमोंसहित दाहिनी ओरको झुकाहुवा—ऐसा भगका भाल अच्छा है ॥ ६३ ॥

विषमं वामावर्तं निर्मांसं संकटं खरं विनतम् ॥
भवति तदेव स्त्रीणां वैधव्यविधायकं प्रायः ॥ ६४ ॥

अन्वयः—(स्त्रीणां तदेव भगस्य भालं विषमं वामावर्त्तं निर्मांसं संकटं खरं विनतं भवेत् प्रायः तत् वैधव्यविधायकं भवति) । अस्यार्थः—स्त्रियोंका सोई भगका भाल ऊंचा, नीचा बाईओरको झुका हुवा, मांसरहित सुकडा-हुवा खरदरा झुकाहुवा होय तौ बहुधा करके विधवापनको करनेवाला होताहै ॥ ६४ ॥

अथ बस्तिकथनम् ।

विपुला बस्तिः शस्ता युवतीनामीषदुन्नता मृद्वी ॥
अभ्युन्नता शराभा लेखा किन्तु रोमशा न शुभा ॥ ६५ ॥

अन्वयार्थौ—(युवतीनां बस्तिः विपुला ईषत् उन्नता मृद्वी शस्ता) स्त्रियोंका पेडू बडा चौडा थोडा ऊंचा नरम होय तौ अच्छाहै और (किन्तु अभ्युन्नता शराभा रोमशा लेखा न शुभा) जो बहुत ऊंचा, तीरके तुल्य बहुत रोमोंकी धारी होय तौ शुभ नहीं है ॥ ६५ ॥

इति तृतीयदर्शी पूर्णा ।

अथ नाभिशुभाशुभलक्षणम् ।

नाभिः शुभा गभीरा सुदृशां वृत्ता प्रदक्षिणावर्ता ॥
स्मरनृपमुद्रेवोपरि रतिमणिकोशस्य रमणस्य ॥ ६६ ॥

अन्वयार्थौ—(सुदृशां वृत्ता नाभिः गभीरा प्रदक्षिणावर्ता शुभा) स्त्रियोंकी गोल टूंडी गहरी दाहिनी ओर झुकीहुई शुभहै और (रतिमणिकोशस्य रमणस्य उपरि स्मरनृपमुद्रा इव) रतिके मणिके खजानेके ऊपर पतिकी कामदेव राजाकी ये मानो मुहर अर्थात् छाप है ॥ ६६ ॥

यस्या विस्तीर्णा स्यान्नवपंकजकर्णिकाकृतिर्नाभिः ॥
सा स्फुटसौभाग्यधनं लभते सुखसंपदां सपदि ॥ ६७ ॥

अन्वयार्थौ–(यस्याः नाभिः विस्तीर्णा स्फुटनवपंकजकर्णिकाकृतिः स्यात्) जिस स्त्रीकी नाभि बहुत लंबी चौड़ी है, मुख जिसका प्रकट नये कमलकासा है भीतरी अंकडेदार ऐसा आकार जिसका होय (सा स्त्री सपदि सुखसंपदां सौभाग्यधनं लभते) सो स्त्री शीघ्रही संपूर्ण सुसंपत्तियोंको धन सौभाग्यको पावे है ॥ ६७ ॥

नाभिर्गभीरविवरा तरुणजनोमनहरा भवति यस्याः ॥
सा जायते मृगाक्षी नियतं पुरुषप्रिया प्रायः ॥ ६८ ॥

अन्वयार्थौ–(यस्याः नाभिः गभीरविवरा तरुणजनमनोहरा भवति) जिस स्त्रीकी टूंडी गहरी अच्छी और तरुणजनोंके मनको हरनेवाली होय (सा मृगाक्षी प्रायः नियतं पुरुषप्रिया जायते) सो स्त्री बहुधा निश्चय करके पतिकी प्यारी होतीहै ॥ ६८ ॥

वामावर्ता यस्या व्यक्ता ग्रंथिः समुत्ताना ॥
सा दुर्भगा पुरंध्री विगर्हिता स्यात्परप्रेष्या ॥ ६९ ॥

अन्वयार्थौ–(यस्याः वामावर्ता व्यक्ता ग्रंथि, समुत्ताना स्यात्) जिस स्त्रीकी टूंडीकी गांठि अर्थात् टुंड बाईं ओरको झुकीहुई प्रकट ऊँची गाँठि होय तो (सा पुरंध्री विगर्हिता परप्रेष्या तथा दुर्भगा भवति) सो स्त्री निंदा करनेयोग्य बुरी और दूसरोंकी टहलनी बुरी सूरतवाली होतीहै ॥ ६९ ॥

इति नाभिकटिचतुर्थदशी पूर्णा ।

अथ कुक्षिः ।

धनतनया जायन्ते सुकुमारैः कुक्षिभिः पृथुभिः ॥
मंडूककुक्षिरबला धन्या नृपतिं सुतं सूते ॥ ७० ॥

अन्वयार्थौ–(सुकुमारैः पृथुभिः कुक्षिभिः बनतनया जायन्ते) अच्छी गुलगुली नरम लंबी चौड़ी कोखों करके बहुत पुत्र होतेहैं और (मंडूककुक्षिः अबला धन्या तथा नृपतिं सुतं सूते) मेंडककीसी कोखमें स्त्री धन्यहै और राजपुत्रको उत्पन्न करतीहै ॥ ७० ॥

वंध्या भवंति वनिताः कुक्षिभिरत्युन्नतैर्वलिभिः ॥
रोमावर्तयुतैस्ताः प्रव्रजिताः पांशुलास्तदा दास्यः ॥ ७१ ॥

अन्वयार्थौ–(वलिभिर्युतैः अत्युन्नतैःकुक्षिभिः वनिताः वंध्या भवंति) सलवटोंकरके युक्त और बहुत ऊंची कोखों करके स्त्रियें बाँझ होतीहैं और (रोमावर्त्तयुतैः कुक्षिभिःतदा ताः वनिताः प्रव्रजिताः पांशुलाः दास्यो भवंति) रोमोंकी भौंरी अर्थात् चक्करीके युक्त कोखें होंय तो वेही स्त्रियां वैरागिणी व्यभिचारिणी और दासी होतीहैं ॥ ७१ ॥

अथ पार्श्वलक्षणम् ।

मग्नास्थिभिः समांसैः पार्श्वैर्मृदुभिः समैर्मृजावद्भिः ॥
यास्यादेभिः सहिता प्रीतिसुभगा जगति जायते नियतम् ७२॥

अन्वयार्थौ–(मग्नास्थिभिः समांसैः मृदुभिः समैः मृजावद्भिः) गडे हुए हैं हाड मांसमें जिसके मुलायम और बराबर, उजले (या स्त्री एतादृशैः पार्श्वैः सहिता स्यात् सा जगति नियतं प्रीतिसुभगा जायते) जो स्त्री ऐसे पाँसुओं सहित होय सो लोकमें निश्चय करके प्रीतियुक्त सौभाग्यवती होतीहै ॥७२॥

यस्याः सशिरे पार्श्वे समुन्नते रोमसंयुते परुषे ॥
सा निरपत्या रमणी भवति प्रायेण दुःशीला ॥ ७३ ॥

अन्वयार्थौ–यस्याः पार्श्वे सशिरे समुन्नते रोमसंयुते परुषे भवतः) जिस स्त्रीकी पांसू नसोंसहित और ऊँची, रोमसहित खरदरी होंय (सा रमणी निरपत्या प्रायेण दुःशीला भवति सो स्त्री संतान रहित बहुधा खोटे स्वभाववाली होतीहै ॥ ७३ ॥

अथोदरलक्षणम् ।

उदरेण मार्दववता तनुत्वचा पीननाभिसहितेन ॥
रोमरहितेन नारीनराधिपतिवल्लभा भवति ॥ ७४ ॥

अन्वयः-(मार्दववता तनुत्वचा पीननाभिसहितेन रोमरहितेन उदरेण नारी नराधिपतिवल्लभा भवति)। अस्यार्थः-जिसके पेटमें मुलायमी और पतली खाल अच्छी टूँडीसहित, विना रोमोंके ऐसे उदरकरके स्त्री राजाकी वल्लभा अर्थात् प्यारी होतीहै ॥ ७४ ॥

तुच्छं दुर्जनमानसमिव जठरं भवति भूपपत्नीनाम् ॥
जनहर्षोत्कर्षकरं सज्जनचेष्टितमिव मनोज्ञम् ॥७५॥

अन्वयार्थौ-(भूपपत्नीनां जठरं दुर्जनमानसमिव तुच्छं भवति) राजाकी रानीका पेट खोटे मनुष्योंके चित्तकी भाँति हलका होताहै और (जनहर्षोत्कर्षकरं सज्जनचेष्टितमिव मनोज्ञं भवति) मनुष्योंको हर्षकरनेवाला और अच्छे पुरुषोंकी चेष्टाकी भाँति सुंदर होताहै ॥ ७५ ॥

कुम्भाकारं जठरं निर्मांसं वा शिरायुतं यस्याः ॥
अतिदुःखिता क्षुधार्ता सा नारी जायते प्रायः ॥ ७६ ॥

अन्वयार्थौ-(यस्याः जठरं कुंभाकारं निर्मांसं वा शिरायुतं भवति) जिस स्त्रीका उदर घड़ेके आकार विना मांस वा नसोंकरके युक्त होय (सा नारी प्रायः क्षुधार्ता अतिदुःखिता भवति) सो स्त्री बहुधा भूँखी और अति-दुःखी होतीहै ॥ ७६ ॥

कूष्मांडफलाकारैरुदरैः पणवोपमैर्मृदंगाभैः ॥
यवतुल्यैर्दुःशीलाः क्लेशायासं स्त्रियो यान्ति ॥ ७७ ॥

अन्वयः-(स्त्रियः कूष्मांडफलाकारैः पणवोपमैः मृदंगाभैः यवतुल्यैः उदरैः दुःशीलाः भवंति, तथा क्लेशायासं यान्ति)। अस्यार्थः-स्त्री जे हैं ते कुम्हडाके फलके आकार, तबला और मृदंगके तुल्य और जौके समान उदर करके खोटे आचरणकी होतीहैं और क्लेश वा परिश्रमको पातीहैं ॥ ७७ ॥

भवति प्रलम्बमुदरं यस्याः सा श्वशुरमाहन्ति ॥
यस्याः पुनर्विशालं चिरापत्या दुर्भगा सापि ॥ ७८ ॥

अन्वयार्थौ–(यस्याः उदरं प्रलम्बं भवति सा श्वशुरम् आहंति (जिस स्त्रीका उदर लम्बा होय सो श्वशुरको मारतीहै और (यस्याः उदरं विशालं भवति सा चिरापत्या दुर्भगा च भवति) जिस स्त्रीका उदर लंबा चौड़ा होय सो बहुत देरमें संतानवाली होतीहै और (सा दुर्भगा अपि भवति) सोई खोटी (बुरी) होतीहै ॥ ७८ ॥

अथ वलीरोमराजिकथनम् ।

असमपयोधरभाराक्रान्तेव सुबंधुरं मध्यम् ॥
मुष्टिग्राह्यं यस्याः सा सौभाग्यश्रियं श्रयते ॥ ७९ ॥

अन्वयः–(यस्याः मध्यं मुष्टिग्राह्यं सुबंधुरं भवति, असमपयोधरभाराक्रांता इव सा सौभाग्यश्रियं श्रयते) । अस्यार्थः–जिस स्त्रीका मध्यस्थल मुठिमें आजाय ऐसा छोटा सुंदर होय सो स्त्री भारी कुचोंके बोझसे मानों दबी हुई सौभाग्यकी शोभा लक्ष्मीको पातीहै ॥ ७९ ॥

शुभगानां वै वलयं वलित्रयेणान्वितं समग्रेण ॥
नाभीलावण्याब्धेरुत्कलिकां भूमिकां वहते ॥ ८० ॥

अन्वयार्थौ–(वै इति निश्चयेन सुभगानां वलयं समग्रेण वलित्रयेण अन्वितं भवति) निश्चय करके सौभाग्यवती स्त्रियोंका मध्यस्थल संपूर्ण तीन सलवटोंकरके युक्त होय तो (नाभीलावण्याब्धेः उत्कलिकां भूमिकां वहते) नाभीकी शोभाके समुद्रकीसी है लहरी जिसमें ऐसी पृथ्वीको धारण करताहै८०॥

रोमलता तनुऋज्वी हृदयांतादुत्थिता शुभा श्यामा ॥
विशतीव नाभिकुहरे मुखेन्दुभीता यथा तिमिररेखा ॥ ८१ ॥

अन्वयार्थौ–(हृदयांतात् उत्थिता तनुऋज्वी रोमलता श्यामा शुभा) छातीके अंतसे उत्पन्नहुई जो पतली सीधी रोमोंकी बेलि काली शुभ है

(का इव मुखेन्दुभीता यथा तिमिररेखा नाभिकुहरे विशति इव) मुखचंद्रमासे डरी जैसे अँधेरेकी रेखा मानों टूंडीके बुलेमें घुसी जाती है ॥ ८१ ॥

कुटिला स्थूला कपिला व्युच्छिन्ना रोमवल्लरी यस्याः ॥
विधवात्वं दौर्भाग्यं लभते प्रायेण सा रमणी ॥ ८२ ॥

अन्वयार्थौ-(यस्याः रोमवल्लरी कुटिला कपिला विच्छिन्ना भवति) जिस स्त्रीकी रोमोंकी बेलि टेढी कुछ कबरी कई रंगकी, बीचमें टूटी होय तो (सा रमणी प्रायेण विधवात्वं च दौर्भाग्यं लभते) सो स्त्री बहुधा करके विधवापन और अभाग्यको पातीहै ॥ ८२ ॥

अथ हृदयम् ।

निर्लोम व्रणरहितं हृदयं यस्याः समं मनोहारि ॥
ऐश्वर्यमवैधव्यं पतिप्रियत्वं भवति तस्याः ॥ ८३ ॥

अन्वयार्थौ-(यस्याः हृदयं निर्लोम व्रणरहितं समं मनोहारि स्यात्) जिस स्त्रीका हृदय विना रोमोंके हो और किसी प्रकारका दाग अर्थात् फोडा फुन्सी नहीं होय और बराबर मनको हरनेवाला होय (तस्याः ऐश्वर्यम् अवैधव्यं पतिप्रियत्वं भवति) तिस स्त्रीका सब प्रकारके आनंदका ठाट और सौभाग्यपन तथा-पतिकी प्यारी होतीहै ॥ ८३ ॥

उद्भिन्नरोमकीर्णं विस्तीर्णं हृदयमिह भवेद्यस्याः ॥
सा प्रथमं भर्तारं हत्वा वेश्यात्वमुपयाति ॥ ८४ ॥

अन्वयार्थौ-(इह यस्याः हृदयम् उद्भिन्नरोमकीर्णं विस्तीर्णं भवेत्) इस लोकमें जिस स्त्रीका हृदय फटा टूटा बहुत रोमयुक्त और बहुत लंबा चौडा होय (सा प्रथमं भर्तारं हत्वा वेश्यात्वम् उपयाति) सो स्त्री पहले पतिको मारिके फिर वेश्यापनको पाती है अर्थात् वेश्या होकर चली जातीहै॥८४॥

पिशितविवर्जितमुन्नतविनतं हृदयं व्रणान्वितं विषमम् ॥
कर्मकरात्वं तनुते वनितानां तत्क्षणादेव ॥ ८५ ॥

अन्वयार्थौ-(यस्याः हृदयं पिशितविवर्जितम् उन्नतं विनतं व्रणान्वितं विषमं भवेत्) जिस स्त्रीका हृदय मांसरहित ऊँचा झुका हुवा और

फोडा फुन्सी आदि चिह्न युक्त ऊँचा नीचा होय तौ (वनितानां मध्ये तत् हृदयं कर्मकरात्वं तत्क्षणादेव तनुते) स्त्रियोंके बीचमें वह हृदय दासी पनको शीघ्रही करैहै ॥ ८५ ॥

अथोरःस्थलम् ।

पीवरमुन्नतमायतमुरःस्थलं न मृदुलं न कठिनं विशिरम् ॥
अष्टादशांगुलमितं रोमविहीनं शुभं स्त्रीणाम् ॥ ८६ ॥

अन्वयः-(स्त्रीणाम् उरःस्थलं पीवरम् उन्नतम् आयतं न मृदुलम् न कठिनं विशिरम् अष्टादशांगुलमितं रोमविहीनं शुभं भवति) । अस्यार्थः- स्त्रियोंकी छातीकी जगह मांससे भरी हुई, ऊंची, लंबी, चौडी, न नरम, न कडी और नसें न दीखती होंय अठारह अंगुलके प्रमाण विना रोमोंके शुभ होतीहै ॥ ८६ ॥

विषमेण भवति हिंस्रा निर्मांसेनोरसा भवति विधवा ॥
अतिपृथुना प्रियकलहा दुःशीला रोमशेनापि ॥ ८७ ॥

अन्वयार्थौ-(विषमेण उरसा नारी हिंस्रा भवति) ऊंची, नीची छाती करिके स्त्री हिंसा करनेवाली होती है और (निर्मांसेन उरसा नारी विधवा भवति) विना मांसकी छातीसे स्त्री विधवा होती है और (अतिपृथुना उरसा नारी प्रियकलहा भवति (बहुत चौडी छातीसे स्त्री कलहकी प्यारी होती है और (रोमशेन उरसा नारी अपि दुःशीला भवति) रोमोंवाली छातीसे स्त्री खोटे स्वभाववाली होतीहै ॥ ८७ ॥

अथ स्तनौ ।

शस्तौ वृत्तौ सुदृढौ पीनौ कठिनौ घनौ स्तनौ सुदृशाम् ।
स्नानाय स्मरनृपतेः काञ्चन कलशाविव प्रगुणौ ॥ ८८ ॥

अन्वयार्थौ-(सुदृशां स्तनौ वृत्तौ सुदृढौ पीनौ कठिनौ घनौ शस्तौ भवतः) स्त्रियोंके कुच गोल अच्छे कडे मांसके भरे बहुत अच्छे होवेहैं

(कौ इव स्मरनृपतेः स्नानाय प्रगुणौ काञ्चनकलशौ इव) कैसे कि मानों कामदेव राजाके स्नानके अर्थ सुंदर सोनेके वे कलशेहैं ॥ ८८ ॥

सुखसौभाग्यनिधानं समुन्नतं स्तनयुगं समं कान्तम् ॥
धत्ते सुवर्णवनिता कुम्भं रुचिरं स्मरेभस्य ॥ ८९ ॥

अन्वयः–(या सुवर्णवनिता समुन्नतं स्तनयुगं समं कान्तं सुखसौभाग्यनिधानम् रुचिरं स्मरेभस्य कुंभं धत्ते)। अस्यार्थः–जिस स्त्रीके ऊंचे दोनों कुच बराबर, सुंदर, सुखसौभाग्यके निधान कहिये स्थान और सुंदर रंगकी स्त्री मानों कामदेव हाथीके कुंभ (गंडस्थल) को धारण करता है८९॥

पुत्रः प्रथमे गर्भे पयोधरे दक्षिणोन्नते स्त्रीणाम् ॥
वामोन्नतेन पुत्री निरपत्यं चैव विषमेण ॥ ९० ॥

अन्वयार्थौ–(स्त्रीणां दक्षिणोन्नते पयोधरे प्रथमे गर्भे पुत्रो भवति) स्त्रियोंके दाहिनी ओरको झुकेहुए कुचोंसे पहिले गर्भसे पुत्र होताहै और (वामोन्नतेन पयोधरेण प्रथमं पुत्री भवति) बांई ओरके झुके हुए कुचों से पहिले गर्भसे पुत्री होती है और (विषमेण पयोधरेण एव निरपत्यं भवति) ऊंचे नीचे कुचोंसे वह विना संतान की होती है ॥ ९० ॥

शुष्के विहीनमध्ये स्थूलाग्रे स्तनयुगेऽङ्गना नैःस्व्यम् ॥
लभते विरले तस्मिन्वैधव्यं पुत्रनाशं च ॥ ९१ ॥

अन्वयार्थौ–(अंगना शुष्के विहीनमध्ये स्थूलाग्रे स्तनयुगे सति नैःस्व्यं लभते) स्त्रीके सूखे; बीचमें ऊंचे नीचे मोटे हैं आगेके भाग जिसके ऐसे दोनों कुचोंके होनेसे दरिद्रताको पावै है और (तस्मिन् स्तनयुगे विरले सति वैधव्यं च पुनः पुत्रनाशं लभते) वेही दोनों कुचोंके बहुत दूर होनेसे विधवापन और पुत्रके नाशको पावै है ॥ ९१ ॥

कुरुते वक्षोजद्वयमरघटघटीनिभं पुरंध्रीणाम् ॥
सततं पूर्वसुखं तत्पश्चादत्यर्थदुःखकरम् ॥ ९२ ॥

अन्वयार्थौ–(पुरंध्रीणां वक्षोजद्वयम् अरघटघटीनिभं चेत् भवति) स्त्रियोंके जो दोनों कुच रहैंटके घडियेकी तुल्य होंय तौ (सततं पूर्वसुखं कुरुते)

निरंतर पहले सुखको करते हैं और पश्चात् (अतिदुःखकरं भवति) पीछे बहुत दुःखके करनेवाले होते हैं ॥ ९२ ॥

अतिनिविडं कुचयुगलं यत्स्त्रियाः पथि च यांत्या हि ॥
सौख्यं सारसवदना सौभाग्यं हन्ति शस्तकरम् ॥ ९३ ॥

अन्वयः-(पथि यान्त्याः स्त्रियाः यत् कुचयुगलम् अतिनिविडं स्यात् तत् सारसवदना सौख्यं शस्तकरं च पुनः सौभाग्यं हंति)। अस्यार्थः-मार्गमें चलती हुई स्त्रीके दोनों कुच जो मिल जायँ तो कमलवदना जो स्त्री है उसका जो कल्याणकारी सुख और सौभाग्य है तिसको फिर नाश करैहै ॥ ९३ ॥

सुदृशां चूचुकयुग्मं शस्तं श्यामं सुवृत्तमतिपीनम् ॥
स्मरनृपतेर्मुद्रेयं रतिसुखनिधिकोशभवनस्य ॥ ९४ ॥

अन्वयः-(सुदृशां चूचुकयुग्मं श्यामं सुवृत्तम् अतिपीनं शस्तं स्मरनृपतेः रतिसुखनिधिकोशभवनस्य इयं मुद्रा)। अस्यार्थः-स्त्रियोंके दोनों कुचोंकी टोटनी साँवरी, गोल और बहुत मोटी मांससे भरी हुई अच्छी होतीहैं और कामदेव राजाके क्याहैं मानों रतिसुखनिधिकोशके घरकी ये मुहर अर्थात छाप हैं ॥ ९४ ॥

दीर्घं चूचुकयुग्मं यस्याः सा प्रियरतिर्भवति ॥
धूर्ता चान्तर्मनसा पुनस्तेनैव द्वेष्टि सा मनुजम् ॥ ९५ ॥

अन्वयार्थौ-(यस्याः चूचुकयुग्मं दीर्घं भवति सा प्रियरतिर्भवति) जिस स्त्रीके कुचोंकी दोनों नोकें बहुत लंबी होंय, सो स्त्री रति में सुख वा प्यार करनेवाली होतीहै और (पुनः अन्तर्मनसा धूर्ता सा तेनैव मनुजं द्वेष्टि) फिर वही भीतरे मनसे धूर्त्त और छलसे उसी मनुष्यसे वैर करतीहै ॥ ९५ ॥

बहिरवनतेन चूचुकयुगलेनातीव सूक्ष्मविषमेण
संप्राप्य च महद्दुःखं दुःशीला जायते योषित् ॥ ९६ ॥

अन्वयः-(बहिरवनतेन अतीव सूक्ष्मविषमेण चूचुकयुगलेन योषित् महद्दुःखं संप्राप्य च पुनः दुःशीला जायते) अस्यार्थः-बाहरकी ओर

झुके हुए और बहुत छोटे पतले ऊंचे नीचे कुचोंकी दोनों नोकोंसे स्त्री बडे दुःखको पाकर फिर व्यभिचारिणी होतीहै ॥ ९६ ॥

इति स्तनषष्ठदशी संपूर्णा ।

अथ जत्रुकथनम् ।

जत्रुभ्यां पीनाभ्यां धनधान्यसुतान्विता भवेद्वनिता ॥
उन्नतिसंहतिमद्भ्यां पुनरेषा भूरिभोगाढ्या ॥ ९७ ॥

अन्वयः–(एषा वनिता पीनाभ्यां जत्रुभ्याम् उन्नतिसंहतिमद्भ्यां धनधान्यसुतान्विता पुनः भूरिभोगाढ्या भवति) । अस्यार्थः–जो स्त्री ऊंचे मांसके भरे अच्छे बनावटके कंधोंके जोड़ोंसे युक्त हो वह धन धान्यवती और बहुत भोग करिके युक्त अर्थात् भोगवती होतीहै ॥ ९७ ॥

श्लथकीकससंधिमता निम्नेन द्रविणलेशपरिहीना ॥
जत्रुयुगलेन योषिद्विषमेण पुनर्भवति विषमा ॥ ९८ ॥

अन्वयार्थौ–(श्लथकीकससंधिमता निम्नेन जत्रुयुगलेन योषित् द्रविणलेशपरिहीना भवति) ढीले हाडोंकी संधिवाले नीचे ऐसे कंधोंके जोड़ोंसे स्त्री थोड़से धनकरिकेभी हीन होतीहै और (पुनः विषमेण जत्रुयुगलेन योषित् विषमा भवति) फिर ऊंचे नीचे कंधोंके जोडों करके स्त्री नटखट खोटी विषके तुल्य होतीहै ॥९८॥

यस्या वंध्या वनिता स्कंधयुगं किंचिदुन्नतं मूले ॥
नातिकृशपीनदीर्घं सुखसौभाग्यप्रदं सुदृशाम् ॥ ९९ ॥

अन्वयार्थौ–(यस्याः स्कंधयुगं मूले किंचित् उन्नतं सा वनिता वंध्या भवति) जिस स्त्रीके दोनों कंधे जड़में कुछ ऊंचे होंय सो स्त्री बाँझ होतीहै और (सुदृशां नातिकृशपीनदीर्घं स्कंधयुगं सुखसौभाग्यप्रदं भवति) स्त्रियोंके न तो बहुत पतले, न मोटे, न लंबे, दोनों कंधे हों तो सुख सौभाग्यके देनेवाले होतेहैं ॥ ९९ ॥

ऊर्द्ध्वस्कंधा कुलटा स्थूलस्कंधापि भारवाहनपरा ॥
चक्रस्कंधा वंध्या दुःखवती रोमशस्कंधा ॥ १०० ॥

अन्वयार्थौ-(ऊर्द्ध्वस्कंधा वनिता कुलटा भवेत्) ऊंचे कंधोंवाली स्त्री खोटी होतीहै और (स्थूलस्कंधा वनिता भारवाहनपरा अपि भवेत्) मोटे कंधोंवाली स्त्री बोझ ढोनेवाली होतीहै और (चक्रस्कंधा वनिता वंध्या भवेत) चक्रवाले कंधोंसे स्त्री बाँझ होती है (रोमशस्कंधा वनिता दुःखवती भवेत्) बहुत रोमवाले कंधोंसे स्त्री दुःखपानेवाली होती है ॥ १०० ॥

अथांसकथनम् ।

निगूढसंधिबंधौ सुसंहतौ पिशितसंयुतौ शस्तौ ॥
अंसौ स्यातां यस्याः सा नारी भूरिसौभाग्या ॥ १०१ ॥

अन्वयार्थौ-(यस्याः अंसौ निगूढसंधिबंधौ सुसंहतौ पिशितसंयुतौ शस्तौ भवतः) जिस स्त्रीके कंधे छिपे हैं जोड़ोंके बंध जिसके और खूब जोडोंसे बँधे-हुए मांससे भरे हुए हों (सा नारी भूरिसौभाग्या भवति) सोइ स्त्री बडी सौभाग्यवती अर्थात् पतिकी प्यारी होतीहै ॥ १०१ ॥

सुदृशां नीचौ स्कंधौ दौर्भाग्यसमन्वितौ च भवतो वै ॥
अत्युच्चैर्वैधव्यं निर्मांसैर्दुःखदारिद्र्यम् ॥ १०२ ॥

अन्वयार्थौ-(सुदृशां नीचौ स्कंधौ वै इति निश्चयेन दौर्भाग्यसमन्वितौ भवतः) स्त्रियोंके नीचे कंधे होंय तो निश्चय करके दौर्भाग्ययुक्त होतेहैं और (अत्युच्चैः स्कंधैः वैधव्यं स्यात्) बहुत ऊंचे होंय तो विधवापन होय और (निर्मांसैः स्कंधैः दुःखदारिद्र्यं भवति) मांस रहित कंधोंसे स्त्री दुःखी और दरिद्रिणी होतीहै ॥ १०२ ॥

अथ कक्षाकथनम् ।

कक्षायुगं सुगंधि स्निग्धं च समुन्नतं पिशितपूर्णम् ॥
तनुमृदुलरोमसहितं प्रशस्यते प्रायशः सुदृशाम् ॥ १०३ ॥

अन्वयः—(सुदृशां कक्षायुगं सुगंधि स्निग्धं समुन्नतं पिशितपूर्णं तनुमृदुलरोमसहितं प्रायशः प्रशस्यते)। अस्यार्थः—स्त्रियोंकी काखें दोनों सुगंधित और अच्छी चिकनी, ऊंची, मांससे भरीहुई पतले और मुलायम रोमों करिके युक्त बहुधा बडाईके योग्य होतीहैं ॥ १०३ ॥

अतिनिम्ने निर्मांसे प्रस्वेदमलान्विते शिराकीर्णे ॥
सोलूखलबहुरोमे कक्षे दौर्भाग्यमावहतः ॥ १०४ ॥

अन्वयः—(अतिनिम्ने निर्मांसे प्रस्वेदमलान्विते शिराकीर्णे सोलूखलबहुरोमे कक्षे दौर्भाग्यम् आवहतः)। अस्यार्थः—बहुत नीचे, विना मांसके, पसीने और मलकरके युक्त नसें जिसमें चमकती हों सो ओखलीकी भाँति बहुत रोमवाली ऐसी काखें अभाग्यको करतीहैं ॥ १०४ ॥

इति सप्तदशी पूर्णा ।

अथ बाहुलक्षणम् ।

शस्तौ बाहू सुदृशां शिरीषतरुपुष्पकोमलौ दीर्घौ ॥
मानुषकुरंगहेतोः पाशाविव पुष्पचापस्य ॥ १०५ ॥

अन्वयार्थौ—(सुदृशां बाहू शिरीषतरुपुष्पकोमलौ दीर्घौ शस्तौ भवतः) स्त्रियोंकी दोनों भुजा शिरसेके फूलकी समान कोमल और बडी लंबी होंय तो श्रेष्ठ होतीहैं (कौ इव—मानुषकुरंगहेतोः पुष्पचापस्य पाशौ इव) मानों क्या-हैं कि मनुष्य हरिणके हेतु कामदेवकी यह फाँसी है ॥ १०५ ॥

निर्लोम बाहुयुगलं गूढास्थिग्रंथि करिकराकारम् ॥
विश्लिष्टशिरासंधि स्त्रीणां सौभाग्यमधिशेते ॥ १०६ ॥

अन्वयः—(स्त्रीणां बाहुयुगलं निर्लोमगूढास्थिग्रंथि करिकराकारं विश्लिष्टशिरासंधि सौभाग्यम् अधिशेते)। अस्यार्थः—स्त्रियोंकी दोनों भुजा विना रोमोंके और छिपी हैं हाडकी गाँठि जिनकी, हाथीकी सूंडके आकार, नसोंके जोड जिनमें न दीखें ऐसी भुजाओंसे सौभाग्य होताहै ॥ १०६ ॥

वैधव्यं वनितानां बाहुभ्यां स्थूलरोमशाभ्यां स्यात् ॥
दौर्भाग्यं ह्रस्वाभ्यां शिरायुताभ्यां परिक्लेशः ॥ १०७ ॥

अस्यार्थः-(स्थूलरोमशाभ्यां बाहुभ्यां वनितानां वैधव्यं स्यात) मोटे रोमों करके युक्त भुजा स्त्रियोंकी होंय तो विधवा होय और (ह्रस्वाभ्यां बाहुभ्यां वनितानां दौर्भाग्यं स्यात) छोटीभुजाओंसे स्त्रियाँ खोटे भाग्यकी होतीहैं और (शिरायुताभ्यां बाहुभ्यां परिक्लेशः स्यात) नसों करके युक्त भुजाओंसे स्त्रियोंको दुःख होताहै ॥ १०७ ॥

अम्भोजगर्भसुभगं मृदु नवसहकारकिसलयाकारम् ॥
तनु विप्रकृष्टसर्वांगुलिकं पाणिद्वयं शस्तम् ॥ १०८ ॥

अन्वयः-(अंभोजगर्भसुभगं मृदु नवसहकारकिसलयाकारं तनुविप्रकृष्टसर्वांगुलिकम् एतादृशं पाणिद्वयं शस्तम्) । अस्यार्थः-कमलके पुष्पके गर्भके समान सुंदर मुलायम, नये आमकी कौंपलोंके तुल्य पतली जुदी जुदी सब अंगुली जिसमें ऐसे दोनों हाथ श्रेष्ठ अर्थात् अच्छे होतेहैं ॥ १०८ ॥

रोमशिरापरिहीनं घनमांसं पाणितलयुगं स्निग्धम् ॥
बहुशुभमनुन्नतमनिम्नं रूक्षं खरं विवर्णं क्लेशदं भवति ॥१०९॥

अन्वयार्थौ-(रोमशिरापरिहीनं घनमांसं स्निग्धं पाणितलयुगं बहुशुभं भवति) रोम और नसों करिके हीन बहुत मांसवाली चिकनी ऐसी दोनों हथेली बहुत शुभ होतीहैं और (अनुन्नतम् अनिम्नं रूक्षं खरं विवर्णं पाणितलयुगं क्लेशदं भवति) ऊंची न हों, नीची गहरी न हों, रूखी, खरदरी, बुरेरंगकी होंय तो ऐसी दोनों हथेली दुःखके देनेवाली होतीहैं ॥ १०९ ॥

यस्याः पाणितलं स्याद्बहुरेखं सा निहंति भर्तारम् ॥
दौर्भाग्यं भाग्यहीनां रेखारहितं पुनस्तनुते ॥ ११० ॥

अन्वयार्थौ-(यस्याः पाणितलं बहुरेखं स्यात् सा भर्त्तारं निहंति)जिस स्त्रीकी हथेलीपै बहुत रेखा होंय सो स्त्री पतिको मारती है और (पुनः

रेखारहितं पाणितलं दौर्भाग्यं भाग्यहीनां तनुते) फिर विना रेखाकी हथेली खोटाभाग्य और भाग्यहीन करै है ॥ ११० ॥

नरलक्षणाधिकारे नारीणामप्यशेषमेवोक्तम् ॥
कररेखालक्ष्म पुनः किंचित्प्रस्तावतो वक्ष्ये ॥ १११ ॥

अन्वयः-(नरलक्षणाधिकारे नारीणाम् अपि अशेषं लक्षणम् उक्तं पुनः कररेखालक्ष्म किंचित प्रस्तावतः वक्ष्ये) । अस्यार्थः-जैसे पुरुषके अधिकारमें लक्षण कहे तैसेही स्त्रियोंके संपूर्ण लक्षण उक्तसे कहे फिर हाथकी रेखाओंके चिह्न कुछ प्रसंगसे कहताहूं ॥ १११ ॥

रक्ता व्यक्ता स्निग्धा गंभीरा वर्तुलाः समाः पूर्णाः ॥
रेखास्तिस्रः स्त्रीणां पाणितले सौख्यलाभाय ॥ ११२ ॥

अन्वयः-(रक्ताः व्यक्ताः स्निग्धाः गंभीराः वर्तुलाः समाः पूर्णाः स्त्रीणां पाणितले तिस्रो रेखाः सौख्यलाभाय भवंति) । अस्यार्थः-लाल, अच्छी प्रकट, चिकनी, गहरी, गोल, बराबर, पूरी स्त्रियोंकी हथेलीमें तीन रेखा जो दीखती हों, तौ-सुखलाभके हेतु होतीहैं ॥ ११२ ॥

मत्स्येन भवति सुभगा हस्तस्थस्वस्तिकेन वित्ताढ्या ॥
श्रीवत्सेन पुनः स्त्री नृपपत्नी नृपतिमाता वा ॥ ११३ ॥

अन्वयार्थौ-(स्त्री हस्ततलस्थेन मत्स्येन सुभगा भवति) स्त्रीकी हाथकी हथेलीमें जो मच्छीकी रेखा होय तौ सौभाग्यवती होतीहै और (हस्ततलस्थस्वस्तिकेन वित्ताढ्या भवति)जो हथेलीमें साथियेका चिह्न होय तौ धनवती होती है और (हस्ततलस्थेन श्रीवत्सेन नृपपत्नी वा नृपतिमाता भवति) जो हथेलीमें श्रीवत्स चिह्न होय तौ राजाकी रानी अथवा राजाकी माता होतीहै ॥ ११३ ॥

पाणितले यस्याः स्यान्नंद्यावर्तः प्रदक्षिणो व्यक्तः ॥
भुवि चक्रवर्तिनः तत्स्त्रीरत्नं भवति भोगार्हम् ॥ ११४ ॥

अन्वयः-(यस्याः पाणितले प्रदक्षिणः व्यक्तः नंद्यावर्त्तः स्यात् तत्स्त्रीरत्नं भुवि चक्रवर्तिनः भोगार्हं भवति)। अस्यार्थः-जिस स्त्रीकी

हथेलीमें दाहिनी ओर प्रकट नंद्यावर्त साथियेका चिह्न होय तौ वह स्त्रीरत्न-(स्त्रियोंमें श्रेष्ठ) पृथ्वीमें चक्रवर्ती राजाके भोगनेके योग्य होताहै ॥११४॥

या करतले कनिष्ठां निर्गत्यांगुष्ठमूलतो याति ॥
सा रेखा भर्तृघ्नी तद्युक्तां नोद्वहेत्कन्याम् ॥ ११५ ॥

अन्वयार्थौ-(करतले या रेखा अंगुष्ठमूलतः निर्गत्य कनिष्ठां याति) हथेलीमें जो रेखा अँगूठेके मूलसे निकल कनिष्ठातक जाय तो (सा रेखा-भर्तृघ्नी भवेत्) सो रेखा पतिको मारनेवाली होतीहै और (तद्युक्तां कन्यां न उद्वहेत्) ऐसी रेखायुक्त कन्याको न विवाहै ॥ ११५ ॥

रेखाभिर्मानतुल्याभिर्जायते सा वणिग्जाया ॥
भवति कृषीवलपत्नी युगसीरोलूखलाकृतिभिः ॥ ११६ ॥

अन्वयार्थौ-(मानतुल्याभिः रेखाभिः सा वणिग्जाया जायते) तौलनेकी वस्तुके प्रमाणके तुल्य रेखाओंकारके युक्त हो सो वैश्यकी स्त्री होतीहै और (युगसीरोलूखलाकृतिभिः रेखाभिः कृषीवलपत्नी भवति) जुवा, हल, ओखलीके आकारकी रेखाओंसे किसानकी स्त्री होतीहै ॥ ११६ ॥

गजवाजिवृषभपद्माः प्रासादधनुर्भोगैर्दुर्वर्ज्याः ॥
यस्याः पाणितले स्युः सा तीर्थकरस्य भुवि जननी ॥११७॥

अन्वयार्थौ-(यस्याः पाणितले गजवाजिवृषभपद्माः प्रासादधनुर्भोगैर्दुर्वर्ज्याः या रेखाः स्युः) जिस स्त्रीकी हथेलीमें हाथी, घोड़ा, बैल, कमल, महल, धनुष् इन करके रहित जो चिह्न होय तो (भुवि सा तीर्थकरस्य जननी भवति) पृथ्वीमें सो स्त्री तीर्थकर अर्थात् धर्मके करनेवालेकी माता होतीहै ॥ ११७ ॥

शंखस्वस्तिकसागरनंद्यावर्तातपत्रतिमिकूर्मैः ॥
वामकरतलनिविष्टैः प्रजायते चक्रिणो माता ॥ ११८ ॥

अन्वयः-(वामकरतलनिविष्टैः शंखस्वस्तिकसागरनंद्यावर्तातपत्रातिमिकूर्मैः चक्रिणः माता प्रजायते) । अस्यार्थः-बायें हाथकी हथेलीमें जो

स्थित शंख, चक्र, समुद्र, नंद्यावर्त चिह्न, आतपत्र कहिये छत्र मछली, कछुवा ऐसे चिह्नों करके चक्रवर्ती राजाकी माता होतीहै ॥ ११८ ॥

ध्वजतोरणभद्रासनचामरभृंगारशीर्षरेखाद्याः ॥
यस्या भवन्ति पाणौ सा जननी वासुदेवस्य ॥ ११९ ॥

अन्वयः—(यस्याः पाणौ ध्वजतोरणभद्रासनचामरभृंगारशीर्षरेखाद्याः भवंति सा स्त्री वासुदेवस्य जननी भवति)। अस्यार्थः—जिस स्त्रीके हाथमें ध्वजा तोरण, राजाका आसन, चमर, जलकी झारी, मस्तकपरके आकार रेखा आदि होंय तो सो स्त्री वासुदेव अर्थात् कृष्णबलदेवकी माता होतीहै ॥ ११९ ॥

श्रीवत्सवर्धमानांकुशगदादित्रिशूलतुल्याभिः ॥
रेखाभिर्जयशब्दो वनितानां जायते सपदि ॥ १२० ॥

अन्वयः—(श्रीवत्सवर्धमानांकुशगदादित्रिशूलतुल्याभिः रेखाभिः वनितानां जयशब्दः सपदि जायते)। अस्यार्थः—श्रीवत्स, वर्धमान, अंकुश, गदा आदि, त्रिशूल इनकेसे आकार रेखा होंय तो स्त्रियोंका जयजय बोलना शीघ्रही होताहै ॥ १२० ॥

मंडूककंकजंबुकवृषकाकोलूकवृश्चिकाः सुदृशाम् ॥
रासभसैरिभकरभाः करस्थिता दुःखमाददते ॥ १२१ ॥

अन्वयः—(सुदृशां करस्थिताः मंडूककंकजंबुकवृषकाकोलूकवृश्चिकाः रासभसैरिभकरभाद्याः दुःखम् आददते)। अस्यार्थः—स्त्रियोंके हाथमें स्थित मेंढक, कंकपक्षी, गीदड़, बैल, कौवा, उल्लू, बिच्छू, गधा, भैंसा, ऊंट आदि जो ये चिह्न होंय तो दुःखको देतेहैं ॥ १२१ ॥

अथांगुष्ठः ।

स्त्रीणां सरलोऽगुष्ठः स्निग्धो वृत्तः शुभस्तथांगुलयः ॥
मृदुलत्वचः सुदीर्घाः क्रमशो वर्तुलाः सुपर्वाणः ॥ १२२ ॥

अन्वयार्थौ—(स्त्रीणाम् अंगुष्ठः सरलः स्निग्धः वृत्तः शुभो भवति) स्त्रियोंका अंगूठा सीधा, सुंदर, चिकना, गोल होय तो शुभ है और

(अंगुलयः मृदुलत्वचः सुदीर्घाः क्रमशः वर्तुलाः सुपर्वाणः शुभा भवंति) अंगुलियाँ मुलायम, पतली त्वचावाली, अच्छी, लम्बी, क्रमशः गोल, अच्छे पोरुवोंकी शुभ होतीहैं ॥ १२२ ॥

चिपिटाः स्फुटाश्च रूक्षाः पृष्ठे रोमान्विताः खराः वक्राः ॥
अतिह्रस्वकृशा विरला विदधति दारिद्र्यमंगुलयः ॥ १२३ ॥

अन्वयः—(चिपिटाः स्फुटाः रूक्षाः पृष्ठे रोमान्विताः खराः वक्राः अति-ह्रस्वाः कृशाः विरलाः स्त्रीणाम् एतादृशा अंगुलयः दारिद्र्यं विदधति) । अस्यार्थः—चपटी, प्रकट, रूखी, अंगुलियोंकी पीठपर रोमयुक्त, खरदरी, टेढ़ी, बहुत छोटी, पतली, जुदी जुदी स्त्रियोंकी अंगुली होंय तो दारिद्यकी करनेवाली हैं ॥ १२३ ॥

अथ नखाः ।

स्निग्धा बंधूकरुचः सशिखास्तुंगाः शुभा नखराः ॥
सुदृशां बिभर्त्यंकुशलीलामनंगगन्धद्विपेन्द्रस्य ॥ १२४ ॥

अन्वयार्थौ—(सुदृशां नखराः स्निग्धाः बंधूकरुचः सशिखाः तुंगाः शुभाः भवंति) स्त्रियोंके नख चिकने, दुपहरियाके पुष्पकी तरह, उजले, चोटीके जो ऊंचे होंय तो शुभ होतेहैं और (अनंगगंधद्विपेन्द्रस्य अंकुशलीलां बिभर्ति) वे ही नख कामदेवसे मतवाले हाथीके अंकुशकी शोभाको धारण करतेहैं ॥ १२४ ॥

रूक्षैर्वक्रैः पीनैः सितैर्विवर्णैः शिखाविरहितैः ॥
शुक्त्याकारैर्वनिता भवंति सौभाग्यधनहीनाः ॥ १२५ ॥

अन्वयः—(रूक्षैः वक्रैः पीनैः सितैः विवर्णैः शिखाविरहितैः शुक्त्याकारैः नखैः वनिताः सौभाग्यधनहीनाः भवंति) । अस्यार्थः—रूखे, टेढे, मोटे, सफेद, बेरंगके, उजली चोटीके, सीपीके आकारवाले नख होयँ तो स्त्री सौभाग्य और धनसे हीन होतीहैं ॥ १२५ ॥

पाणिचरणयोर्थस्या जायन्ते बिन्दवो नखेषु सिताः ॥
सा जगति सुसितनखा दुःखाय स्वैरिणी रमणी ॥ १२६ ॥

अन्वयः-(यस्याः पाणिचरणयोः नखेषु सिता बिंदवो जायंते जगति सुसितनखा सा रमणी स्वैरिणी तथा-दुःखाय भवति)। अस्यार्थः- जिस स्त्रीके हाथ पाँवके नखोंमें सफेद छींटें होंय तो संसारमें ऐसे नखवाली स्त्री व्यभिचारिणी और दुःखके अर्थ होतीहै ॥ १२६ ॥

अथ पृष्ठिः ।

सरला शुभसंस्थाना निर्लोमा मध्यमाग्रवंशास्थिः ॥
पृष्ठिः पिशितोपचिता सुखसौभाग्यप्रदा स्त्रीणाम् ॥ १२७ ॥

अन्वयार्थौ-(स्त्रीणां पृष्टिः सरला शुभसंस्थाना निर्लोमा मध्यमाग्रवंशास्थिः शुभा भवति) स्त्रियोंकी पीठ सूधी, अच्छे आकारकी, विना रोमोंकी, बीचमेंसे आगेतकको हड्डीकी शुभ होतीहै और (पिशितोपचिता पृष्ठिः सुखसौभाग्यप्रदा भवति) मांससे खूब भरी पीठसे सुख और सौभाग्यकी देनेवाली होतीहै ॥ १२७ ॥

भुग्नवलितेन दासी भर्तृघ्नी भामिनी विशालेन ॥
साशिरेण सदुःखा स्याद्विधवा पृष्टेन रोमभृता ॥ १२८ ॥

अन्वयार्थौ-(भामिनी भुग्नवलितेन पृष्ठेन दासी स्यात्) स्त्री टेढी सलवटोंवाली पीठसे दासी होती है और (विशालेन पृष्ठेन भर्तृघ्नी स्यात्) बडी और लंबी पीठसे पतिके मारनेवाली होती है और (सशिरेण पृष्ठेन सुदुःखा स्यात्) जिसमें नसें चमकती हों ऐसी पीठसे दुःख सहित होती है और (रोमभृता पृष्ठेन विधवा स्यात्) रोमोंवाली पीठसे विधवा होती है ॥ १२८ ॥

अथ कृकाटिकालक्षणम् ।

ऋज्वी कृकाटिका स्यात्समांसपीना समुन्नता यस्याः ॥
दीर्घायुर्विधवात्वं लभते सा सौख्यसौभाग्यम् ॥ १२९ ॥

अन्वयार्थौ–(यस्याः कृकाटिका ऋज्वी स्यात् सा दीर्घायुर्लभते) जिस स्त्रीका गलेका गट्टा अर्थात् गलेकी घेंटी सूधी होय सो स्त्री बडी आयु पावै और (समांसपीना कृकाटिका विधवात्वं लभते) जिसकी मांससे भरी मोटी गलेकी घेंटी होय सो विधवापनको पावै और (यस्याः कृकाटिका समुन्नता स्यात् सा स्त्री सौख्यसौभाग्यं लभते) जिस स्त्रीकी गलेकी घेंटी उँचाई लिये होय सो स्त्री सुख सौभाग्यको पाती है ॥ १२९ ॥

बहुपिशिता निष्पिशिता शिराचिता रोमशा विशाला च ॥
कुटिला विकटा कुरुते दौर्भाग्यं प्रायशः सुदृशाम् ॥ १३० ॥

अन्वयः–(सुदृशां बहु पिशिता निष्पिशिता शिराचिता रोमशा कुटिला विकटा कृकाटिका स्यात् सा प्रायशः दौर्भाग्यं कुरुते) । अस्यार्थः– स्त्रियोंकी बहुत मांसवाली या विनामांसकी, नसें चमकती हों, रोमवाली, बडी लंबी, बुरी, भयंकर जो गलेकी घेंटी होय सो बहुधा अभाग्यको करती है ॥ १३० ॥

मांसोपचितः कंठो वृत्तश्चतुरंगुलः शुभो विशदः ॥
उच्चविलासं कथयति वदनांभोजस्य वनितानाम् ॥ १३१ ॥

अन्वयार्थौ–(वनितानां वदनाम्भोजस्य कंठः मांसोपचितः वृत्तः चतुरंगुलः विशदः शुभः) स्त्रियोंका कंठ मांससे भरा, गोल, चार अंगुलका, उज्वल शुभ है और (उच्चविलासं कथयति) बडे आनंद भोगको कहता है ॥ १३१ ॥

यस्याः सुसंहिता स्फुटरेखात्रितयांकिता भवेद्ग्रीवा ॥
सालंकारं कनकं मुक्तारत्नान्यंगना दधते ॥ १३२ ॥

अन्वयः–(यस्याः ग्रीवा सुसंहिता स्फुटरेखात्रितयांकिता भवेत् सा अंगना कनकालंकारमुक्तारत्नानि दधते) । अस्यार्थः–जिस स्त्रीकी नाड

मिलीहुई प्रकट तीन रेखा चिह्नोंसे अंकित होय सो स्त्री सुवर्णका गहना मोती और रत्नोंको पहरती है ॥ १३२ ॥

व्यक्तास्थिर्निर्मांसा चिपिटा स्फुटा कुरूपसंस्थाना ॥
सोपदिशति ग्रीवा योषाणां दुःखदौर्भाग्यम् ॥ १३३ ॥

अन्वयः-(योषाणां ग्रीवा व्यक्तास्थिः निर्मांसा चिपिटा स्फुटा कुरूपसंस्थाना स्यात्, सा ग्रीवा दुःखदौर्भाग्यम् उपदिशति)। अस्यार्थः-स्त्रियोंकी नाड प्रकट हाडोंकी, विनामांसकी, चपटी, फटी, बुरे स्वरूपकी होय सो नाड दुःख और अभाग्यका उपदेश करती है ॥ १३३ ॥

ग्रीवा स्थूला विधवां चक्रावर्ता स्त्रियं वंध्याम् ॥
सशिरा ह्रस्वा निःस्वां कुरुते दीर्घा पुनः कुटिलाम् ॥ १३४ ॥

अन्वयार्थौ-(स्थूला ग्रीवा स्त्रियं विधवां कुरुते) मोटी नाडी स्त्रीको विधवा करतीहै और (चक्रावर्ता ग्रीवा स्त्रियं वंध्यां कुरुते) चक्रचिह्नवाली नाड स्त्रीको बाँझ करती है और (ह्रस्वा सशिरा ग्रीवा स्त्रियं निःस्वां कुरुते) छोटी और नसोंवाली नाड स्त्रीको दरिद्रिणी करतीहै और (दीर्घा ग्रीवा स्त्रियं कुटिलां कुरुते) बड़ी और लंबी नाड स्त्रीको खोटी करतीहै ॥ १३४ ॥

इति ग्रीवाष्टदशी संपूर्णा ।

अथ चिबुकम् ।

द्व्यंगुलमानं चिबुकं वृत्तं पीनं सुकोमलं शस्तम् ॥
स्थूलं द्विधा विभक्तं रोमशमत्यायतं शुभं न स्यात् ॥ १३५ ॥

अन्वयार्थौ-(द्व्यंगुलमानं वृत्तं पीनं सुकोमलं चिबुकं शस्तम्) दो अंगुल प्रमाण, गोल, मांसल, मुलायम ऐसी ठोड़ी अच्छीहै और (स्थूलं द्विधा विभक्तं रोमशम् अत्यायतं चिबुकं न शुभं स्यात्) मोटी, दुहरीसी रोमवाली, बहुत लंबी, ठोडी अच्छी नहीं होतीहै ॥ १३५ ॥

अथ हनुकथनम् ।

निर्लोम शुभं सुघनं हनुयुगलं चिबुकपार्श्वसंलग्नम् ॥
अतिवक्रकृशं स्थूलं पुनरशुभं रोमशं दृश्यम् ॥ १३६ ॥

अन्वयार्थौ–(निर्लोमसुघनं चिबुकं पार्श्वसंलग्नं हनुयुगलं शुभम्) विनारोमोंके, अच्छे, कडे, ठोडीके पास ही लगेहुए ऐसे दोनों हनु शुभ हैं और (पुनः अतिवक्रकृशं स्थूलं रोमशं दृश्यम् अशुभं भवति) फिर बहुत टेढे, सूखेसे मोटे, रोमवाले दीखें तो अशुभ होतेहैं ॥ १३६ ॥

अथ कपोललक्षणम् ।

शस्ते कपोलफलके पीने वृत्ते समुन्नते विमले ॥
पुलिन इव त्रिस्रोतसः कुसुमायुधयादसां स्त्रीणाम् ॥१३७ ॥

अन्वयार्थौ–(पीने वृत्ते समुन्नते विमले स्त्रीणां कपोलफलके शस्ते) मांससे भरे, गोल, बराबर ऊंचे, उजले स्त्रियोंके कपोलफलक अच्छे होतेहैं (के इव) क्याहैं मानों (कुसुमायुधयादसां त्रिस्रोतसः पुलिने इव) कामदेव जलजीवोंके गंगाके पुलिन अर्थात् रेतके गुदगुदे टीले हैं ॥ १३७॥

यस्याः कपोलयुगलं विच्छायं रोमसंयुतं परुषम् ॥
रूक्षं स्वभावनिम्नमसितं सा दुःखिनी च स्यात् ॥ १३८ ॥

अन्वयः–(यस्याः कपोलयुगलं विच्छायं रोमसंयुतं परुषं रूक्षं स्वभावनिम्नम् असितं स्यात्, सा च स्त्री दुःखिनी भवेत्) । अस्यार्थः–जिस स्त्रीके दोनों कपोल विना रंग, रोमयुक्त, टेढे, रूखे, स्वभावकरिके नीचे, काले होंय तो सो स्त्री दुखिया होतीहै ॥ १३८ ॥

अथ वदनम् ।

वर्तुलममलं स्निग्धं सुपूर्णशीतांशुमंडलविडंबि ॥
सौम्यं सम समांसं सुपरिमलं प्रशस्यते वदनम् ॥ १३९ ॥

अन्वयः–(वर्तुलम् अमलं स्निग्धं सुपूर्णशीतांशुमंडलविडंबि सौम्यं समं समांसं सुपरिमलं वदनं प्रशस्यते) । अस्यार्थः–गोल, निर्मल, सचिक्कण

पूरे चंद्रमाके बिम्बकी तुल्य सुंदर बराबर, मांससे भरा, सुगंधित जो ऐसा मुख होय तो प्रशंसाके योग्य है॥ १३९ ॥

जनकवदनानुरूपं यस्या मुखपंकजं सदाह्लादि ॥
सा कल्याणी प्रायेणेति समुद्रः पुरा वदति ॥ १४० ॥

अन्वयार्थौ-(यस्याः मुखपंकजं जनकवदनानुरूपं सदाह्लादि) जिस स्त्रीका मुखकमल पिताके मुखके तुल्य होय तो सदा प्रसन्न करनेवाला है (प्रायेण सा कल्याणी भवति इति समुद्रः पुरा वदति) बहुधा सो स्त्री कल्याणकी करनेवाली होतीहै समुद्रने यह बात पहलेसे कहीहै ॥ १४० ॥

तुरगोष्ट्रखरबिडालव्याघ्रच्छागाननाकारम् ॥
पृथुलं निम्नं स्फुटितं दुर्गन्धं शस्यते न मुखम् ॥ १४१ ॥

अन्वयः-(तुरगोष्ट्रखरबिडालव्याघ्रच्छागाननाकारं पृथुलं निम्नं स्फुटितं दुर्गन्धं मुखं न शस्यते)। अस्यार्थः-घोडा, ऊंट, गधा, बिलाव, सिंह, बकरा इनके तुल्य होय और चौडा, नीचा, फटासा, दुर्गंधवाला मुख निन्दित है ॥ १४१ ॥

अथौष्ठबिम्बम् ।

रेखाखंडितमध्यो मसृणः परिपक्वबिम्बफलतुल्यः ॥
अधरोष्ठः स्निग्धोऽसौ मनोहरो हरिणशावदृशाम् ॥ १४२ ॥

अन्वयः-(रेखा खंडितमध्यः मसृणः परिपक्वबिम्बफलतुल्यः स्निग्धः हरिणशावदृशाम् अधरोष्ठः मनोहरः भवति)। अस्यार्थः-रेखा करके खंडित है बीच जिसका चिकना, पके हुए, कुँदुरूके फलके तुल्य अच्छे, चिकने, हिरणके बच्चोंकेसे नेत्र जिनके ऐसी मृगांगनाओंके होठ मनके हरनेवाले होतेहैं अर्थात् अच्छे हैं ॥ १४२ ॥

शस्तः सुधानिधानं सततमधरोष्ठपल्लवो व्यक्तः ॥
हृदयोत्थसदनुरागच्छटाभिरिव रंजितः स्त्रीणाम् ॥ १४३ ॥

अन्वयः–(सुधानिधानं व्यक्तः हृदयोत्थसदनुरागच्छटाभिः रंजित इव स्त्रीणाम् अधरोष्ठपल्लवः शस्तः)। अस्यार्थः–अमृतका स्थान, प्रकट हृदयसे जो उठा है अच्छा अनुराग जिसकी कांतिसे रँगाहुवा ऐसा स्त्रियोंका होठ नवीन पत्तेके तुल्य निरंतर अच्छा होताहै ॥ १४३ ॥

विषमोऽलघुः प्रलम्बः प्रस्फुटितः खंडितः कृशो रूक्षः ॥
दन्तच्छदोङ्गनानां दत्ते दौर्भाग्यदुःखत्वे ॥ १४४ ॥

अन्वयः–(विषमः अलघुः प्रलम्बः प्रस्फुटितः खंडितः कृशः रूक्षः अंगनानां दन्तच्छदः दुःखदौर्भाग्यं दत्ते)। अस्यार्थः–ऊंचा, नीचा, बडा, लंबा, फटा, टूटा हुआ, कटा, पतला, रूखा स्त्रियोंका ऐसा होठ होय तो दुःख और अभाग्यको देताहै ॥ १४४ ॥

श्यामेन भर्तृहीना स्थूलेन कलिप्रिया भवति नारी ॥
अधरोष्ठेन प्रायो दौर्गत्ययुता विवर्णेन ॥ १४५ ॥

अन्वयार्थौ-(श्यामेन अधरोष्ठेन नारी भर्तृहीना भवति) काले होठोंसे स्त्री पतिहीन होतीहै और (स्थूलेन अधरोष्ठेन नारी कलिप्रिया भवति) मोटे होठों कारिके स्त्री कलह करनेवाली होतीहै और (विवर्णेन अधरोष्ठेन प्रायः दौर्गत्ययुता भवति) बुरे रंगके होठोंसे बहुधा दरिद्रिणी होतीहै ॥ १४५ ॥

सुदृशामिहोत्तरोष्ठः पर्यायनतः सकोमलो मसृणः ॥
स्निग्धो रोमाविरहितः किंचिन्मध्योन्नतः शस्तः ॥ १४६ ॥

अन्वयः–(इह सुदृशाम् उत्तरोष्ठः पर्यायनतः सकोमलः मसृणः स्निग्धः रोमविरहितः किंचिन्मध्योन्नतः शस्तः) । अस्यार्थः–इस लोकमें स्त्रियोंके ऊपरका होठ क्रम करके झुका हुवा, मुलायम, चिकना, विना रोमका कुछ बीचमें उँचाई लिये होय तो अच्छाहै ॥ १४६ ॥

भवति पृथुरुत्तरोष्ठः समुन्नतो लोमशो लघुर्यस्याः ॥
स्थूलः सा रमणी स्याद्विधवा कलहप्रिया प्रायः ॥ १४७ ॥

अन्वयः–(यस्याः उत्तरोष्ठः पृथुः समुन्नतः लोमशः लघुः स्थूलः भवति, सा रमणी प्रायः विधवा वा कलहप्रिया स्यात्) । अस्यार्थः–

जिस स्त्रीका ऊपरका होठ चौंडा मोटा, ऊँचा, रोमवाला, छोटा, होय सो बहुधा विधवा वा कलह करनेवाली होतीहै ॥ १४७ ॥

अथ दशनलक्षणम् ।

स्निग्धैः समैः शिखरिभिः समुन्नतैर्विशदकुंदसमशुभ्रैः ॥
दशनैर्घनैस्तरुण्यः सौभाग्यैश्वर्यभोगिन्यः ॥ १४८ ॥

अन्वयः—(स्निग्धैः समैः शिखरिभिः समुन्नतैः विशदकुंदसमशुभ्रैः घनैः दशनैः तरुण्यः सौभाग्यैश्वर्यभोगिन्यो भवन्ति) । अस्यार्थः—चिकने,चमकने, बराबर नोंकें निकली हों, ऊंचे हों और उजले कुंदके फूलके तुल्य सफेद, एकसे एक भिडे होंय तो ऐसे दाँतोंसे स्त्रियाँ सौभाग्य वा ऐश्वर्यकी भोगनेवाली होतीहैं ॥ १४८ ॥

शुचिरुचयो द्वात्रिंशद्दशना गोक्षीरसन्निभाः सर्वे ॥
अध उपरि समा यस्याः सा क्षितिपतिवल्लभा बाला ॥ १४९ ॥

अन्वयः—(यस्याः सर्वे दशनाः शुचिरुचयः गोक्षीरसन्निभाः अध उपरि समाः द्वात्रिंशत भवंति, सा बाला क्षितिपतिवल्लभा भवति) । अस्यार्थः—जिस स्त्रीके सब दाँत उजले, रुचिकारी, गौके दूधके तुल्य, नीचे ऊपर बराबर, बत्तीस होंय सो स्त्री पृथ्वीपति (राजा)की प्यारी होतीहै ॥१४९॥

अतिह्रस्वदीर्घसूक्ष्माः स्थूला द्विपंक्तयो दशनाः ॥
विषमाः शुक्त्याकाराः श्यामास्तन्वन्ति दौर्गत्यम् ॥ १५० ॥

अन्वयः—(अतिह्रस्वदीर्घसूक्ष्माः स्थूलाः द्विपंक्तयः विषमाः शुक्त्याकाराः श्यामा ईदृशाः दशनाः दौर्गत्यं तन्वंति)। अस्यार्थः—बहुत छोटे, लम्बे पतले मोटे, दुहरी पंक्तिके, ऊंचे नीचे, सीपीके आकार, काले होंय तो ऐसे दाँतोंसे स्त्री दारिद्रिणी वा दुखिया होतीहै ॥ १५० ॥

नियतं रदैरधस्तादधिकैर्निजमातृभक्षिणी रमणी ॥
अध उपरि पुनर्विरलैः कुटिला विकटैश्च पतिरहिता ॥१५१॥

अन्वयार्थौ—(अधस्तात् रदैः अधिकैः नियतं रमणी निजमातृभक्षिणी भवति) नीचेके दाँत बहुत होनेसे निश्चय स्त्री अपनी माताकी मारनेवाली

होतीहै और (पुनः अध उपरि विरलैः रदैः कुटिला भवति) जो नीचे ऊपर जुदे जुदे दाँत होंय तो खोटी होतीहै और (वा विकटैः रदैः पतिरहिता भवति) जो भयंकर दाँत होंय तो विना पतिकी अर्थात् विधवा होतीहै ॥ १५१ ॥

सितपीठिकास्थिरदा सक्लेशा दंतुरा पुनः कुटिला ॥
चलितरदा पतिरहिता निरपत्या घनमतिर्युवतिः ॥ १५२ ॥

अन्वयार्थौ–(सितपीठिकास्थिरदा नारी सक्लेशा भवति) सफेद मसूडे नीचेके हाडके दाँतसे स्त्री क्लेशसहित रहती है और (पुनः दंतुरा नारी कुटिला भवति) फिर खूब बडे दाँतवाली स्त्री खोटी होतीहै और (चलितरदा नारी पतिरहिता वा निरपत्या घनमतिर्युवतिः भवति) चलायमान हैं दाँत जिसके ऐसी स्त्री पति पुत्र रहित और कठोर बुद्धिवाली होतीहै१५२॥

अथ जिह्वालक्षणम् ।

जिह्वा स्निग्धा मृद्वी शोणा मसृणा तनुर्भवति यस्याः ॥
मिष्टान्नभोजना स्यात्सौभाग्ययुता सा सदा रमणी ॥ १५३ ॥

अन्वयार्थौ–(यस्याः जिह्वा स्निग्धा मृद्वी शोणा मसृणा तनुर्भवति) जिस स्त्रीकी जीभ अच्छी, मुलायम, लाल, चिकनी, पतली होय (सा रमणी सौभाग्ययुता सदा मिष्टान्नभोजना स्यात्) सो स्त्री सौभाग्ययुक्त और सदा मीठे भोजनके पानेवाली होतीहै ॥ १५३ ॥

स्यादंते संकीर्णा कुशस्येवाग्रविस्तीर्णा वा ॥
श्वेतापि न प्रशस्ता कृष्णा प्रायेण रमणीनाम् ॥ १५४ ॥

अन्वयः–(जिह्वा अंते कुशस्येव संकीर्णा वा अग्रविस्तीर्णा, श्वेता कृष्णा जिह्वा प्रायेण रमणीनाम् अपि न प्रशस्ता) । अस्यार्थः–जीभ अंतमें सकडी और डाभकी भाँति आगेको चौडी, सफेद और काली जीभ बहुधा स्त्रियोंकी अच्छी नहींहै ॥ १५४ ॥

खरया तोये मरणं प्राप्नोति विवाहमेति पाटलया ॥
वर्णच्छेद कलहं श्यामलया जिह्वया युवती ॥ १५५ ॥

अन्वयार्थौ–(युवती खरया जिह्वया तोये मरणं प्राप्नोति) स्त्री खरदरी जीभकरके पानीमें डूबके मरे और (पाटलया जिह्वया विवाहम् एति) कुछ श्वेत कुछ लाल जीभ करके विवाहको पातीहै और (श्यामलया जिह्वया वर्णच्छेदं तथा कलहं प्राप्नोति) काली जीभ करके अपनी जातिसे दूसरी जाति होय और कलहको पातीहै ॥१५५॥

दारिद्र्यं मांसलया विशालया रसनया पुनः शोकः ॥
अतिलम्बयापि सततमभक्ष्यभक्षणरतिः स्त्रीणाम् ॥ १५६ ॥

अन्वयार्थौ–(मांसलया रसनया दारिद्र्यं पुनः विशालया रसनया शोकं प्राप्नोति) मोटी जीभसे दरिद्रताको पावे और फिर बडी लंबी जीभसे शोकको पातीहै और (अतिलंबया अपि सततं स्त्रीणाम् अभक्ष्यभक्षणरतिर्भवति) बहुतलंबी जीभसे निरंतर स्त्रियोंकी जो खाने योग्य वस्तु नहीं उसे खानेमें चाहना अर्थात् प्रीति होतीहै ॥ १५६ ॥

अथ तालुलक्षणम् ।

स्निग्धं कोकनदच्छवि प्रशस्यते तालु कोमलं विमलम् ॥
श्यामं पीनं च पुनः सुदृशां दुःखावहं बहुशः ॥ १५७ ॥

अन्वयार्थौ–(सुदृशां स्निग्धं कोकनदच्छवि कोमलं विमलं तालु प्रशस्यते) स्त्रियोंका सुंदर, चिकना, लाल, कमलकीसी कांतिवाला, मुलायम, उज्ज्वल तालु प्रशंसाके योग्य अर्थात् अच्छा है और (पुनः श्यामं पीनं तालु बहुशः दुःखावहम्) फिर वही काला मोटा तालु होय तो बहुत दुःखको करनेवालाहै ॥ १५७ ॥

तालुनि सिते दरिद्रा पतिहीना दुःखिता भवति कृष्णे ॥
प्रव्रज्यासंयुक्ता रूक्षे समले पुनर्नारी ॥ १५८ ॥

अन्वयार्थौ–(तालुनि सिते सति नारी दरिद्रा) सफेद तालु होनेसे स्त्री दरिद्रिणी और (तालुनि कृष्णे सति पति हीना दुःखिता भवति) काले

तालु होनेसे पतिरहित, दुःखी होतीहै (पुना रूक्षे समले सति प्रव्रज्या-संयुक्ता जायते) रूखे मलिन तालु हुए वैरागिणी या पतिसंयोगरहित होतीहै ॥ १५८ ॥

अथ घंटीलक्षणम् ।

कंदस्थूला वृत्ता क्रमशस्तीक्ष्णलोहिता शुभा घंटी ॥
स्थूला सूक्ष्मा लम्बा कृष्णा श्वेता शुभा नैव ॥ १५९ ॥

अन्वयार्थौ–(कंदस्थूला वृत्ता क्रमशः तीक्ष्णलोहिता घंटी शुभा) जमीकंदकी भाँति मोटी, गोल, क्रमसे पैनी, लाल रंगकी घंटी शुभ है और (स्थूला सूक्ष्मा लम्बा कृष्णा श्वेता घंटी नैव शुभा) मोटी, पतली, लंबी, काली, सफेद घंटी शुभ नहीं है ॥ १५९ ॥

अथ हास्यलक्षणम् ।

ईपद्विकासितगंडं हसितमलक्ष्यद्विजं कलं शस्तम् ॥
प्रान्ते मुहुः सकंपं संमीलितलोचनं निंद्यम् ॥ १६० ॥

अन्वयार्थौ–(ईपद्विकसितगंडम् अलक्ष्यद्विजं कलं हसितं शस्तम्) थोडे खुले हैं गंडस्थल जिसमें, नहीं दीख पडे दाँत जिसमें ऐसा सुंदर हँसना अच्छा है और (प्रान्ते मुहुः सकंपं संमीलितलोचनं हसितं निंद्यं भवति) अंतमें बारंबार हाथ पाँव कँपे हिलें जिसमें और मुँदगयेहैं नेत्र जिसमें ऐसा हँसना निन्दित अर्थात् बुरा होताहै ॥ १६० ॥

अथ नासालक्षणम् ।

निःस्वां द्विधाग्रभागा कर्मकरां नासा स्त्रियं लघ्वी ॥
भर्तृविहीनां चिपिटा दीर्घा बहुकोपनां कुरुते ॥ १६१ ॥

अन्वयार्थौ–(द्विधाग्रभागा नासा स्त्रियं निःस्वाम्) दोसी दीखैहैं नाक आगेके भागमें जिसकी ऐसी नाक स्त्रीको दरिद्रिणी करे और (लघ्वी नासा स्त्रियं कर्मकराम्) छोटी नाक स्त्रीको गुलामिनि करे और (चिपिटा

दीर्घा नासा स्त्रियं भर्तृविहीनां तथा बहुकोपनां कुरुते) चिपटी लंबी नाक स्त्रीको पतिरहित और बहुत क्रोधवाली करैहै ॥ १६१ ॥

अथ क्षुतलक्षणम् ।

दीर्घं दीर्घायुक्तं क्षुतं कृतपिंडितं ह्लादि ॥
अनुनादयुतं शस्तं ततोऽन्यथा भवति विपरीतम् ॥ १६२ ॥

अन्वयार्थौ–(दीर्घं क्षुतं दीर्घायुक्तं कृतपिंडितं ह्लादि) बडी छींक भारी बडी न छोटी गोलाकार हुई ऐसी आनंदकारी है और (अनुनादयुतं क्षुतं शस्तम्) शब्द सहित अथवा पिछला शब्दयुक्त छींक अच्छी है और (ततः अन्यथा विपरीतं भवति) इनसे और लक्षणकी छींक बुरी होतीहै॥१६२॥

अथाक्षियुगलक्षणम् ।

गोक्षीरचारुलसिते रक्तांते कृष्णतारके तीक्ष्णे ॥
प्रच्छन्नं कथयितुमिव कर्णविलग्ने शुभे नयने ॥ १६२ ॥

अन्वयः–(गोक्षीरचारुलसिते रक्तान्ते कृष्णतारके तीक्ष्णे शुभे नयने प्रच्छन्नं कथयितुम् इव कर्णविलग्ने भवतः)। अस्यार्थः–गौके दूधके समान श्वेत रंग शोभायमान लाल हैं अंत जिनके काले हैं तारे जिनमें गुप्त कहनेको मानों कानके पास आयके लगे हैं ऐसे नेत्र शुभ होतेहैं ॥ १६३ ॥

नीलोत्पलदलतुल्यैर्विमलैः सूक्ष्मपक्ष्मभिः स्निग्धैः ॥
नयनैरिहार्ककमलैर्भवन्ति सौभाग्यभोगिन्यः ॥ १६४ ॥

अन्वयः–(नीलोत्पलदलतुल्यैः विमलैः सूक्ष्मपक्ष्मभिः स्निग्धैः अर्ककमलैः इव नयनैः नार्यः सौभाग्यभोगिन्यो भवंति) । अस्यार्थः–नील कमलकी पँखुरीके तुल्य निर्मल, पतली हैं बरोनी जिनकी, अच्छे चिकने, जैसे सूर्यसे कमल खिले हुए ऐसे नेत्रों करिके स्त्री सौभाग्यके भोग करनेवाली होवैहै १६४

मृगनेत्रा शशनेत्रा वराहनेत्रा मयूरनेत्रा च ॥
पृथुनेत्राम्बुजनेत्रा निर्मलनेत्रा शुभा नारी ॥ १६५ ॥

अन्वयः–(मृगनेत्रा शशनेत्रा वराहनेत्रा मयूरनेत्रा पृथुनेत्रा अम्बुजनेत्रा निर्मलनेत्रा नारी शुभा भवति) । **अस्यार्थः**–हरिणकेसे नेत्रवाली, खरगोशकेसे नेत्रवाली सूकरकेसे नेत्रवाली, मोरकेसे नेत्रवाली, बडे लम्बे चौडे नेत्रवाली, कमलकेसे नेत्रवाली और उजले नेत्रवाली, स्त्री अच्छी होतीहै ॥ १६५ ॥

उद्भ्रान्तचित्ता केकरविषमाक्षी निन्दिताक्षी भवेद्युवतिः ॥
मेषाक्षी बिडालाक्षी वृत्ताक्षी समुन्नताक्षी न दीर्घायुः ॥ १६६ ॥

अन्वयार्थौ–(केकरविषमाक्षी निन्दिताक्षी उद्भ्रान्तचित्ता युवतिर्भवेत) काणी, ऊंचे नीचे, निंदित नेत्रवाली, उडसे चित्तवाली होतीहै और (मेषाक्षी विडालाक्षी वृत्ताक्षी समुन्नताक्षी नारी दीर्घायुः न) मेंढेकीसी नेत्रवाली, बिलावकीसी नेत्रवाली, गोल नेत्रवाली, ऊंचे नीचे नेत्रवाली स्त्री बडी आयुवाली नहीं होतीहै ॥ १६६ ॥

यस्याः पिङ्गलनेत्रद्वितयं सा सुरतसुखकौशलं लभते ॥
दुःशीलत्वेन समं वैधव्यं वा ध्रुवं रमणी ॥ १६७ ॥

अन्वयार्थौ–(यस्याः पिंगलनेत्रद्वितयं भवति सा रमणी सुरतसुखकौशलं लभते) जिस स्त्रीके पीले रंगकेसे दोनों नेत्र होंय सो स्त्री भोगके सुखको पातीहै अथवा (दुःशीलत्वेन समं ध्रुवं वैधव्यं लभते) वह खोटे स्वभावके साथ निश्चय करके विधवापनको पातीहै ॥ १६७ ॥

गोपिङ्गलनेत्रयुता पितरं श्वशुरं च मातुलं च पुत्रम् ॥
भ्रातरमप्यधिगच्छति कामग्रथिला च मोहपरा ॥ १६८ ॥

अन्वयः–(या नारी गोपिङ्गलनेत्रयुता भवति सा कामग्रथिला च पुनः मोहपरा वै पितरं श्वशुरं मातुलं पुत्रं भ्रातरम् अपि अधिगच्छति) ।

अस्यार्थः–जो गौकेसे रंग बराबर पीले नेत्रवाली होय सो स्त्री कामकी अधिकताके कारण और मोहके मदमें तत्पर होनेसे निश्चय पिता, श्वशुर, मामा, पुत्र और भाईसे अधिक कामकी चाहना करतीहै अर्थात् इनसे भोग चाहतीहै ॥ १६८ ॥

कोकनदच्छदरक्तच्छायं नयनद्वयं भवति यस्याः ॥
सा परपुरुषाकांक्षिणी रमणी च नित्यं स्यात् ॥ १६९ ॥

अन्वयः–(यस्याः कोकनदच्छदरक्तच्छायं नयनद्वयं स्यात्, सा रमणी परपुरुषाकांक्षिणी नित्यं भवति)। अस्यार्थः–जिस स्त्रीके लाल कमलकी पँखुरीके रंगके तुल्य दोनों नेत्र होंय उस स्त्रीको दूसरे पुरुषकी चाहना नित्य होतीहै ॥ १६९ ॥

सजलनयना न शस्ता स्फारितनयना विहीनतरा ॥
नरनयना कोटरनयना चंचलनयना गभीरनयनापि ॥१७०॥

अन्वयार्थौ–(सजलनयना नारी न शस्ता) जलसे भरे नेत्रवाली स्त्री अच्छी नहीं और (स्फारितनयना नारी विहीनतरा) फटेसे नेत्रवाली स्त्री बहुत खोटी होतीहै और (नरनयना कोटरनयना गंभीरनयना चंचलनयना अपि नारी अशुभा भवति) मनुष्यकेसे नेत्रवाली, चलायमान नेत्रवाली, वृक्ष-कोटरके तुल्य नेत्रवाली, गहरे गढेसे नेत्रवाली स्त्री अशुभ होतीहै ॥१७०॥

या सव्यकाणचक्षुः सा परपुरुषाभिचारिणी रमणी ॥
अपसव्यकाणचक्षुः सा जन्मन्येव निरपत्या ॥ १७१ ॥

अन्वयार्थौ–(या नारी सव्यकाणचक्षुः स्यात्, सा रमणी परपुरुषा-भिचारिणी भवति) जो स्त्री बाईं आँखसे काणी होय सो स्त्री दूसरे पुरुषके भोगनेकी चाहसे व्यभिचारणी होतीहै और (या नारी अपसव्यकाणचक्षुः भवति सा रमणी जन्मन्येव निरपत्या स्यात्) जो स्त्री दाहिनी आँखसे काणी होय सो स्त्री जन्मसे विना संतानके होतीहै अर्थात् बाँझ होतीहै ॥ १७१ ॥

अथ पक्ष्मलक्षणम् ।

सुदृढैः स्निग्धैः कृष्णैः सूक्ष्मैः स्यात्पक्ष्माभिर्घनैः सुभगा ॥
सूक्ष्मैर्विरलैः कपिलैः स्थूलैर्निंद्या ध्रुवमजाभैः ॥ १७२ ॥

अन्वयार्थौ–(सुदृढैः स्निग्धैः कृष्णैः सूक्ष्मैः पक्ष्मभिः नारी सुभगा स्यात्) कड़ी, चिकनी, काली, पतली, बहुत पास लगीहुई बरोंनियोंसे स्त्री अच्छी सुंदर सौभाग्यवती होतीहै और (सूक्ष्मैः विरलैः कपिलैः स्थूलैः अजाभैः ध्रुवं पक्ष्मभिः नारी निंद्या स्यात्) पतली, जुदी जुदी, पीली मोटी, बकरीकीसी कांतिवाली निश्चय ऐसी बरोनियोंसे स्त्री निन्द्य अयोग्य अर्थात् अशुभ होतीहै ॥ १७२ ॥

रोदनमनिमेषलक्षणमासामपि पुरुषवत्परिज्ञेयम् ॥
ग्रंथप्रपंचभयतः पुनरिह दिङ्मात्रमपि नोक्तम् ॥ १७३ ॥

अन्वयार्थौ–(रोदनम् अनिमेषलक्षणम् आसाम् अपि पुरुषवत् परिज्ञेयम्) रोना और पलकोंके न लगनेके लक्षण पुरुषकी भाँति इनके भी जानने चाहियें और (पुनः इह ग्रंथप्रपंचभयतः दिङ्मात्रम् अपि न उक्तम्) फिर यहां ग्रंथके बढनेके भयसे दिशा मात्रकेभी लक्षण नहीं कहे ॥ १७३ ॥

अथ भ्रूलक्षणम् ।

शस्ता वृत्ता तन्वी भ्रूयुगली[1] कज्जलच्छाया ॥
नयनांभोरुहवलयितरूपा नालं समाश्रयति ॥ १७४ ॥

अन्वयार्थौ–(वृत्ता तन्वी कज्जलच्छाया भ्रूयुगली शस्ता) गोलरूप काली कांतिकी दोनो भौंहें अच्छी हैं और (नयनांभोरुहवलयितरूपा भ्रूयुगली अलं न समाश्रयति) नेत्रोंके कमलोंको घेरनेवाली दोनों भौंहें अच्छी नहीं होतीहैं ॥ १७४ ॥

लघुमृदुरोममयी भ्रूरधिज्यधनुरिव शुभा सुदृशाम् ॥
कीर्णा पिंगलवृत्ता पृथुला खररोमशान शुभा ॥ १७५ ॥

अन्वयार्थौ–(सुदृशां लघुमृदुरोममयी अधिज्यधनुरिव भ्रूः शुभा स्यात्)

१–अस्य नपुंसकत्वेऽपि छन्दोऽपूर्तेः सन्देहान्स्त्रीत्वमुक्तं कविनेति प्रातिभाति ।

स्त्रियोंकी छोटी, नरम रोमवाली और चढी हुई कमानके रूप भौंहैं शुभ हैं और (कीर्णा पिंगलवृत्ता पृथुला खररोमशा भ्रू न शुभा भवति) जुदे जुदे बिखरेसे बालवाली पीले रंगवाली गोल चौडी खरदरे रोमवाली भौंहें नहीं शुभ हैं ॥ १७५ ॥

वित्तविहीनां ह्रस्वा मिलिता स्थूला सदैव दुःशीलाम् ॥
वंध्यां सुदीर्घरोमा रमणीं भ्रूवल्लरी कुरुते ॥ १७६ ॥

अन्वयार्थौ–(ह्रस्वा भ्रूवल्लरी रमणीं वित्तविहीनाम्) छोटे भौंह स्त्रीको धनरहित करै और (मिलिता स्थूला भ्रूवल्लरी रमणीं सदैव दुःशीलाम्) मिली हुई मोटी भौंहरूप बेलि स्त्रीको सदा खोटे चलनवाली करे और (सुदीर्घरोमा भ्रूवल्लरी रमणीं वंध्यां कुरुते) बड़े लंबेरोमवाली भौंह रूप बेलि स्त्रीको बांझ करै है ॥ १७६ ॥

अथ कर्णलक्षणम्।

लम्बा विपुला कर्णद्वयी मिलिता शुभावर्त्तसंयुक्ता ॥
दोलायुगलाविरतिप्रीतिं दंपतिकृते युगपत् ॥ १७७ ॥

अन्वयार्थौ–(कर्णद्वयी लम्बा विपुला मिलिता आवर्तसंयुक्ता शुभा) दोनों कान लंबे बडे मिले हुए चक्र युक्त होंय तौ शुभ हैं और (दोला युगलाविरतिप्रीतिं दंपतिकृते युगपत् कुरुते) दोझूलोंके चक्ररूपसे स्त्री पुरुष-के लिये आपसमें प्रीति करैहै ॥ १७७ ॥

रोमोपगता यस्याः शष्कुलिरहिता च नो शस्ता ॥
कुटिला कृशा शिराला नारी सा जायते निंद्या ॥ १७८ ॥

अन्वयार्थौ–(यस्याः कर्णद्वयी रोमोपगता शष्कुलिरहिता नो शस्ता) जिस स्त्रीके दोनो कानमें रोमयुक्त विना प्यालीके होंय तौ अच्छे नहीं और (कुटिला कृशा शिराला कर्णद्वयी नारी सा निंद्या जायते) टेढे, पतले, न-सोंवाले दोनों कानोंसे स्त्री बुराईके योग्य होतीहै ॥ १७८ ॥

इति आचिबुककर्णमंतः संपूर्णा मंददशी।

अथ ललाटलक्षणम् ।

निर्लोमशिराविरहितमर्द्धेन्दुसमं ललाटतलम् ॥
त्र्यंगुलमानमनिम्नं स्त्रीणां सौभाग्यमावहति ॥ १७९॥

अन्वयः–(निर्लोम शिराविरहितम् अर्द्धेन्दुसमं त्र्यंगुलमानम् अनिम्न ललाटतलं स्त्रीणां सौभाग्यम् आवहति) । अस्यार्थः--रोमरहित, नसों विना, आधे चंद्रमाके समान, तीन अंगुल प्रमाण, ऊंचा, ऐसा ललाट स्त्रियोंके सौभाग्यको करता है ॥ १७९ ॥

रेखारहितं व्यक्तं स्वस्तिकसमलंकृतं शुभं भालम् ॥
प्रगुणं पट्टमिव स्मरनृपस्य राज्याभिषेकाय ॥ १८० ॥

अन्वयार्थौ–(व्यक्त रेखारहितं स्वस्तिकसमलंकृतं भालं शुभम्) प्रकट रेखा करके रहित स्वस्तिक(साथिया) करके भूषित ऐसा ललाट शुभ है और (स्मरनृपस्य राज्याभिषेकाय प्रगुणं पट्टम् इव) कामदेव राजाके राज्याभिषेकके अर्थ मानों यह दृढ़ वस्त्र है ॥ १८० ॥

यस्याः प्रलम्बमलिकं सा तु नारी देवरं निजं हंति ॥
तदपि शिरारोमयुतं सा भवेत्पांसुला बाला ॥ १८१ ॥

अन्वयार्थौ–(यस्याः अलिकं प्रलम्बं सा नारी निजं देवरं हंति) जिस स्त्रीका ललाट लम्बा होय सो स्त्री अपने देवरको मारतीहै और (तदपि भालं शिरारोमयुतं भवेत् सा बाला पांसुला भवति) जो वही लम्बा ललाट नसें और रोमयुक्त होय तो सो स्त्री व्यभिचारिणी होती है ॥ १८१ ॥

अथ सीमंतलक्षणम् ।

सीमन्तो ललनानां ललाटपट्टाश्रितः शुभः सरलः ॥
प्रगुणित इवार्द्धचंद्राकृतिः कृतः पुष्पचापेन ॥ १८२ ॥

अन्वयार्थौ--(ललनानां ललाटपट्टाश्रितः सरलः सीमन्तः शुभः) स्त्रियोंके ललाटपट्टके आश्रित सीधी सीमंत अर्थात् माँग शुभ है और (पुष्पचापेन अर्द्धचंद्राकृतिः प्रगुणितः कृतः इव) कामदेवने आधे चंद्रमाके आकार मानों यह दृढ किया है ॥१८२॥

अथ शीर्षलक्षणम्।

कुंजरकुम्भनिभं स्याद्वृत्तं शीर्षं समुन्नतं यस्याः॥
सा भवति भूपपत्नी सौभाग्यैश्वर्यसुखसहिता॥ १८३॥

अन्वयः-(यस्याः शीर्षं समुन्नतं वृत्तं कुंजरकुंभनिभं स्यात् सा भूपपत्नी सौभग्यैश्वर्यसुखसहिता भवति)। अस्यार्थः-जिस स्त्रीका मस्तक उँचाई लिये गोल हाथीके शिरकी तुल्य होय सो राजाकी स्त्री सुख सौभाग्य सब सुहागवती होतीहै॥ १८३॥

स्थूलेन भवति शिरसा विधवा दीर्घेण बंधकी युवतिः॥
विषमेण विषमदुःखा दौर्भाग्यवती विशालेन॥ १८४॥

अन्वयार्थौ-(स्थूलेन शिरसा विधवा स्यात्) बड़े मोटे मस्तकवाली विधवा होय और (दीर्घेण शिरसा युवतिः बंधकी भवति) लम्बे चोड़े मस्तकमे स्त्री व्यभिचारिणी अर्थात् खोटी होतीहै और (विषमेण शिरसा विषम-दुःखा भवति) ऊंचे नीचे मस्तक करिके अत्यन्त दुःखी होतीहै और (वि-शालेन शिरसा दौर्भाग्यवती भवति) बहुत बड़े मस्तकवाली स्त्री अभागिनी होती है॥ १८४॥

अथ केशलणक्षम्।

रोलम्बसमच्छायाः सूक्ष्माः समुन्नताः स्निग्धाः॥
केशाः एकैकभवा जायन्ते भूपपत्नीनाम्॥ १८५॥

अन्वयः-(रोलम्बसमच्छायाः सूक्ष्माः समुन्नताः स्निग्धाः एकैकभवाः भूपपत्नीनाम् ईदृशाः केशाः जायन्ते)। अस्यार्थः-भौंरेकी समान काले, पतले और ऊंचे चमकदार, चिकने सुन्दर इकहरे होंय तो राजाकी स्त्रियोंके ऐसे बाल होतेहैं॥ १८५॥

आकुंचिताग्रभागाः स्निग्धांबुजकालकान्तयः सुभगाः ॥
चिकुरा हरंति यमुनातरंगभंगीं वरस्त्रीणाम् ॥ १८६ ॥

अन्वयः (आकुंचिताग्रभागाः स्निग्धाम्बुजकालकान्तयः सुभगाः वरस्त्रीणां चिकुराः यमुनातरंगभंगीं हरन्ति) । अस्यार्थः-सिकुड रहे हैं आगेके भाग जिनके अर्थात् घुँघरारे ऐसे सचिक्कण काले कमलके रंग चमकदार, सुंदर (अच्छे) स्त्रियोंके ऐसे बाल मानों यमुनाकी तरंगकी रचनाको हरतेहैं ॥ १८६ ॥

यस्याः प्रस्फुटिताग्राः सूक्ष्माः परुषाः शिरोरुहा लघवः ॥
उच्चा विरला जटिला विषमा सा दुःखिनी युवतिः ॥१८७॥

अन्वयः-(यस्याः शिरोरुहाः प्रस्फुटिताग्राः सूक्ष्माः परुषाः लघवः उच्चा विरला जटिला विषमा भवंति युवतिः दुःखिनी स्यात्) । अस्यार्थः-जिस स्त्रीके बाल फटे हुए हैं आगेके भाग जिसके ऐसे और पतले, रूखे, खरदरे, छोटे, ऊंचे, बिखरे हुए, लिपटे, ऊंचे नीचे होय सो स्त्री दुखिया होतीहै ॥१८७॥

अतिशयदीर्घस्थूलैर्भर्तृघ्नी कामिनी भवति ॥
केशैः कपिलैरमनस्कारस्कंधप्रभवैः पुनर्निंद्या ॥ १८८ ॥

अन्वयार्थौ-(अतिशयदीर्घस्थूलैः केशैः कामिनी भर्तघ्नी भवति) बहुत बड़े, लम्बे, मोटे बालोंसे स्त्री पतिको मारनेवाली होतीहै और (पुनः कपिलैः अमनस्कारस्कंधप्रभवैः केशैः नारी निंद्या भवति) फिर भूरे, बुरे, कंधोंतक छिटके हुए बालोंसे स्त्री बुराईके योग्य अर्थात् बुरी होतीहै॥ १८८॥

इति श्रीमहत्तमश्रीनृसिंहात्मजदुर्लभराजविरचिते सामुद्रिकतिलकेऽपरनाम्नि नरस्त्रीलक्षणशास्त्रे संस्थानाधिकारश्चतुर्थः ॥ ४ ॥

अथ व्यंजनलक्षणम् ।

व्यंजनमथ प्रकृतयो मिश्रकमेतदपि भवति संख्यानम् ॥
संक्षेपाल्लक्षणमथ ह्यनुक्रमेणैव वक्ष्यामि ॥ १ ॥

अन्वयः-(अथ व्यंजनं प्रकृतयः मिश्रकम् एतत् अपि संक्षेपाल्लक्षणम् अनुक्रमेण एव संख्यानं वक्ष्यामि) । अस्यार्थः-आगे व्यंजन और प्रकृति और मिश्रक इनके संक्षेप लक्षण क्रम करके इसी संख्यासे मैं कहूँगा ॥ १ ॥

जन्मान्तरं व्यंजनमिह शुभाशुभं व्यज्यते ध्रुवं येन ॥
तनुमयमहत्त्वगादि व्यंजनमाख्यायते सद्भिः ॥ २ ॥

अन्वयार्थौ-(इह येन जन्मान्तरं शुभाशुभं ध्रुवं व्यज्यते तत् व्यंजनम्) इस ग्रंथमें जिसकरके पहले जन्मका शुभ अशुभ लक्षण निश्चय करके प्रकट किया होय तिसका नाम व्यंजन है और (तनुमयमहत्त्वगादि सद्भिः व्यजनम् आख्यायते) शरीरसंबंधी बडी चर्म आदिकको पंडित व्यंजन कहतेहैं ॥ २ ॥

अथ मशकलक्षणम् ।

रक्तः कृष्णो धूम्रो बिन्दुसमो मशक एव विज्ञेयः ॥
तिलकं तिलकाकारं ततोऽन्यदपि लांछनं स्त्रीणाम् ॥ ३ ॥

अन्वयार्थौ-(रक्तः कृष्णः धूम्रः बिन्दुसमः मशक एव विज्ञेयः) लाल काला, धूएँकासा, बूँद समान होय उसीका नाम मशक जानिये और (तिलकं तिलकाकारं ततः स्त्रीणाम् अन्यदपि लांछनं भवति) तिलके आकार तिल, तिसके पीछे कोई और चिह्न स्त्रियोंके होय उसका नाम लांछन होताहै ॥ ३ ॥

अन्तर्भ्रूयुग्मे वा ललाटमध्ये विलोक्यते यस्याः ॥
सुस्निग्धाभो मशकः सा भवति महीपतेः पत्नी ॥ ४ ॥

अन्वयः--(यस्याः अंतर्भ्रूयुग्मे वा ललाटमध्ये सुस्निग्धाभः मशकः विलोक्यते सा स्त्री महीपतेः पत्नी भवति) । अस्यार्थः-जिस स्त्रीकी

दोनों भौंहोंके बीचमें वा ललाटके बीचमें सुंदर मशक देख पडे सो स्त्री राजाकी रानी होतीहै ॥ ४ ॥

अन्तर्वामकपोले स्फुटता मशकन लोहिता भवति ॥
मिष्टान्नभोजनमत्ति प्रायेण सा नितम्बिनी लोके ॥ ५ ॥

अन्वयार्थौ–(या अन्तर्वामकपोले मशकेन स्फुटता लोहिता भवति) जो स्त्री बाँयेंकपोलमें प्रकट मसासे लाल होय (सा नितंबिनी लोके प्रायेण मिष्टान्नभोजनम् अत्ति) सो स्त्री लोकमें बहुधा मीठे भोजनको पातीहै ॥५॥

अथ तिलकलक्षणम् ।

तिलकं लांछनमथवा हृदि रक्ताभं विलोक्यते यस्याः ॥
सा धनधान्योपेता पतिप्रिया जायते पत्नी ॥ ६ ॥

अन्वयः–(यस्याः हृदि रक्ताभं तिलकम् अथवा लांछनं विलोक्यते सा पत्नी धनधान्योपेता पतिप्रिया जायते)। अस्यार्थः–जिस स्त्रीके हृदयमें लाल तिल वा और कोई चिह्न दीखें सो स्त्री धन धान्यसे युक्त और पतिकी प्यारी होतीहै ॥ ६ ॥

रक्तं तिलकं लांछनमपसव्यपयोधरे भवति यस्याः ॥
पुत्रीचतुष्टयं सा सुतत्रयं चांगना सूते ॥ ७ ॥

अन्वयः- (यस्याः अपसव्यपयोधरे रक्तं तिलकं लांछनं भवति, सा अंगना पुत्रीचतुष्टयं च पुनः सुतत्रयं सूते)। अस्यार्थः–जिस स्त्रीके दाहिने कुचमें लाल तिल अथवा कोई और चिह्न होय सो स्त्री चार पुत्री और तीन-पुत्रको उत्पन्न करैहै ॥ ७ ॥

तिलके शुभवामकुचे विलासवती तदा स्वनालेन ॥
स्फुटमेकपुत्रजननी सा विधवा दुःखिनी भवति ॥ ८ ॥

अन्वयः–(शुभवामकुचे तिलके सति विलासवती स्वनालेन स्फुटम् एक-पुत्रजननी पश्चात् विधवा तथा दुःखिनी भवति) । अस्यार्थः–जो सुंदर बायें

कुचमें तिल होय तो अपने नाल करिके प्रकट एक पुत्रकी जननेवाली होक पीछे विधवा और दुखिया होतीहै ॥ ८ ॥

गुह्यस्य कुंकुमाभस्तिलकः प्रान्तेऽथ दक्षिणे भागे ॥
सा भवति भूपपत्नी नृपजननी जायते वापि ॥ ९ ॥

अन्वयः-(यस्या गुह्यस्य प्रान्ते अथ दक्षिणे भागे कुंकुमाभः तिलको भवति सा भूपपत्नी वा नृपजननी अपि भवति) । अस्यार्थः—जिस स्त्रीकी योनिके पास या दाहिने तिल हो वह राजाकी पत्नी या माता होतीहै ॥९॥

मशको लोहितवर्णो नासाग्रे दृश्यते स्फुटो यस्याः ॥
सा भूपपट्टराज्ञी राजानं सूयते सूनुम् ॥ १० ॥

अन्वयः—(यस्या नासाग्रे लोहितवर्णः मशकः स्फुटः दृश्यते सा भूपपट्टराज्ञी वा राजानं सूनुं सूयते) । अस्यार्थः—जिस स्त्रीकी नाकके आगेके भागमें लाल रंगका तिल वा मस्सा प्रकट दीख पडे सो राजाकी पटरानी वा राजा पुत्रको उत्पन्न करे ॥ १० ॥

विस्फुरति नासिकाग्रे यस्यास्तिलकः सकज्जलच्छायः ॥
भर्तृघ्नी सा नारी विशेषतः पांसुला भवति ॥ ११ ॥

अन्वयः—(यस्याः नासिकाग्रे सकज्जलच्छायः तिलकः विस्फुरति सा नारी भर्तृघ्नी वा विशेषतः पांसुला भवति) अस्यार्थः—जिस स्त्रीकी नाकके आगेके भागमें काला तिल प्रकट होय सो स्त्री पतिको मारे और विशेष करके वह व्यभिचारिणी होतीहै और खोटी होतीहै ॥ ११ ॥

नाभेरधोविभागे मशको वा तिलकलांछने स्याताम् ॥
यस्या भवतः स्निग्धे सा रमणी वहति कल्याणम् ॥१२॥

अन्वयः—(यस्याः नाभेरधोविभागे मशकः वा तिलकलांछने स्निग्धे भवतः सा रमणी कल्याणं वहति)। अस्यार्थः—जिस स्त्रीकी टूंडीके नीचेके भागमें मस्सा अथवा तिल वा और कोई चिह्न चमकता होय तो सो स्त्री कल्याणको प्राप्तकरनेवाली होतीहै ॥ १२ ॥

स्यातां गुल्फौ यस्याः स्फुटलांछनमशकतिलकसंयुक्तौ ॥
सा धनधान्यविहीना दुःखवती जीवति प्रायः ॥ १३ ॥

अन्वयः–(यस्याः गुल्फौ स्फुटलांछनमशकतिलकसंयुक्तौ स्यातां सा धनधान्यविहीना प्रायः दुःखवती जीवति) । अस्यार्थः–जिस स्त्रीके टकनेमें प्रकट चिह्न मस्सा वा तिल युक्त होय सो धनधान्य रहितसे बहुधा दुखिया होकर जीवतीहै ॥ १३ ॥

वामे हस्ते कंठे वा काये जायते ध्रुवं यस्याः ॥
मशको यदि वा तिलकः प्राग्गर्भे सा सुतं सूते ॥ १४ ॥

अन्वयः–(यस्याः काये वामे हस्ते वा कंठे मशकः यदि वा तिलकः ध्रुवं जायते, सा प्राक् गर्भे सुतं सूते) । अस्यार्थः–जिस स्त्रीके शरीरमें बायें हाथमें वा कंठमें मस्सा वा तिलक निश्चय होय सो स्त्री पहलेही गर्भमें पुत्रको उत्पन्न करतीहै ॥ १४ ॥

मशकं तिलकं लांछनमुक्तस्थाने कृताशुभं यासाम् ॥
अंगे पुनरपसव्ये सुदृशां क्लेशावहं बहुशः ॥ १५ ॥

अन्वयार्थौ–(यासां सुदृशाम् उक्तस्थाने मशकं तिलकं लांछनम् अशुभं कृतम्) जिन स्त्रियोंके कहे हुए स्थानोंमें मस्सा तिल और कोई चिह्न होय तो अशुभ है और (पुनः अपसव्ये अंगे बहुशः क्लेशावहं भवति) फिर जो दाहिने अंगमें चिह्न न होय तो अतिदुःखके करनेवाले होतेहैं ॥ १५ ॥

अथ प्रकृतिलक्षणम् ।

प्रकृतिर्द्विविधा गदिता स्त्रीणां श्लेष्मादिका स्वभावाख्या ॥
प्रथमा सापि त्रेधा द्वादशधा भवति पुनरन्या ॥ १६ ॥

अन्वयः–(स्त्रीणां प्रकृतिर्द्विविधा गदिता श्लेष्मादिका च पुनः स्वभावाख्या, सापि प्रथमा त्रेधा पुनः अन्या द्वादशधा भवति) । अस्यार्थः–स्त्रियोंकी प्रकृति दो प्रकारकी कही है श्लेष्मादिक और स्वभाव; सो पहली तीन प्रकारकी है, फिर दूसरी १२ प्रकारकी होतीहै ॥ १६ ॥

नारीमतेऽस्ति प्रकृतिः सत्यप्रियभाषिणी स्थिरस्नेहा ॥
बहुप्रसूतिं लभते नीलोत्पलदूर्वांकुरश्यामा ॥ १७ ॥

अन्वयार्थौ-(नारीमते प्रकृतिः अस्ति, सा नारी स्थिरस्नेहा भवति) स्त्रीके मतमें स्वभाव है सो स्त्री स्थिर स्नेह अर्थात् स्थिरप्रीति वाली होतीहै और (सत्यप्रियभाषिणी भवति) सच्ची और मीठा बोलनेवाली होतीहै और तथा (नीलोत्पलदूर्वांकुरश्यामा बहुप्रसूतिं लभते) नील कमल और दूबके अंकुरके समान श्यामरंग, बहुत जननेवाली होतीहै ॥ १७ ॥

स्निग्धनखरोमत्वंनारी सुविलोचना क्षमायुक्ता ॥
सुविभक्तसमावयवा बहुसत्यापत्यवीर्ययुता ॥ १८ ॥

अन्वयार्थौ-(स्निग्धनखरोमत्वक् सुविलोचना नारी क्षमायुक्ता भवति) चिकने हैं नख, रोम और त्वचा जिसके और सुंदर नेत्रोंकरके युक्त ऐसी स्त्री क्षमावाली होतीहै और (सुविभक्तसमावयवा बहुसत्यापत्यवीर्ययुता भवति) जुदे जुदे हैं बराबर हाथ पाँव आदि अंग जिसके ऐसी स्त्री बहुत सत्य और संतान और पराक्रम युक्त होतीहै ॥ १८ ॥

अस्थूला सरसा त्वक्प्रसूनतुल्यानुलेपना सुभगा ॥
धर्मार्थिनी कृतज्ञा दयान्विता कमलपदा सुमुखी ॥ १९ ॥

अस्यार्थः-मोटी न होय, पतली होय, सूखी खरदरी न होय रसदार होय ऐसी त्वचा फूलकासा है अनुलेपन जिसमें और धर्मसेही है प्रयोजन जिसमें, कहेको माननेवाली और दयावती कमलकेसे हैं पाँव जिसके और सुंदर है मुख जिसका ऐसी स्त्री अच्छी होतीहै ॥ १९ ॥

प्रच्छन्न धृतवेषा क्षुत्तृष्णाक्षमात्रपोपेता ॥
मितवचना पानभोजनसमया क्षमातले पृथुलनयना ॥ २० ॥

अन्वयः-(क्ष्मातले पृथुलनयना नारी प्रच्छन्नं धृतवेषा, क्षुत्तृष्णाक्षमात्रपोपेता मितवचना पानभोजनसमया स्यात)। अस्यार्थः-पृथ्वीमें बड़े नेत्रवाली

स्त्री गुप्त धरे हैं अनेक वेष जिसने, भूँख प्यास सहनशीलता और लज्जा इन चारों करिके युक्त, प्रमाणके वचन हैं जिसके, अन्न जल है समयपै जिसके ऐसी होतीहै ॥ २० ॥

साधारणसुरतेच्छा निद्रालुः शीतमांसलश्रोणिः ॥
जलदजलाशयजलजकृतवांछा या भवेत्स्वप्ने ॥ २१ ॥

अस्यार्थः—साधारण है सुरतकी इच्छा जिसकी, निद्रावती अर्थात् जिसको निद्रा अधिक होय, ठंढी है मांससे भरी योनि जिसकी और स्वप्नेमें (सोनेमें) मेघ और पानीके स्थान और पदार्थ इनमें वांछा करनेवाला होतीहै २१ ॥

योषित्पित्तप्रकृतिः गौरी कृष्णाऽथ वा हृष्टा ॥
आताम्रा नयनकररुहरसनापाणितलतालुतलाः ॥ २२ ॥

अन्वयार्थौ–(पित्तप्रकृतिः योषित् गौरी कृष्णा अथवा हृष्टा) पित्तके सुभाववाली स्त्री गोरेरंग वा काली प्रसन्न रहती है और (नयनकररुहरसनापाणितलतालुतला आताम्रा भवंति) नेत्र, नख, जीभ, हाथकी हथेली, तालु, पाँवका तलुवा ये जिसके लाल होतेहैं वह अच्छी है ॥ २२ ॥

क्षणक्षणविकसच्चेष्टाऽभीष्टशीतमधुरसा पुनर्मृद्वी ॥
विरलकपिलमूर्द्धजरोमा मेधावती प्रायः ॥ २३ ॥

अन्वयार्थौ–(क्षणक्षणविकसच्चेष्टा) छिनछिनमें खिले आते हैं देहव्यापार जिसके और (अभीष्टशीतमधुरसा) प्यारा है शीत और मीठा रस जिसका (पुनर्मृद्वी) फिर मुलायम है शरीर जिसका (प्रायः विरलकपिलमूर्द्धजरोमा मेधावती भवति) बहुधा जुदे जुदे भूरे रंगके बाल और रोम जिसके सो बुद्धिमती होतीहै ॥ २३ ॥

प्रियशुचिवसनमाल्या उपनाडच्युष्णशिथिलमृदुगुह्या ॥
अभिमानिनी शुचिरता विशदस्मितवल्लभा शूरा ॥ २४ ॥

अस्यार्थः—प्यारे हैं पवित्र कपड़े और माला जिसके फिर कैसी है वह उपनाडी (छोटी नसें) युक्त और गरम है गुदगुदी ढीली नरम योनि जिसकी

गर्ववती और पवित्र वार्तोंकी चाहनेवाली, निर्मल है हँसना प्यारा जिसका और जो शूरा है वह शुभ है ॥ २४ ॥

धृतवलिपलितक्षुत्तृट् तनुवीर्या मृदुलमोहनक्रीडा ॥
किंशुकादिग्दाहताडिद्दहनादीन्पश्यति स्वप्ने ॥ २५ ॥

अस्यार्थः–धारण करी हैं सलवट और छींक, प्यास थोड़ा है साहस, मुलायम भोग जिसका वह टेसूके फूल और दिशाओंका जलना और बिजली आग आदिको देखती है ॥ २५ ॥

वनिता वातप्रकृतिः स्फुटितकचा भग्नपादतला ॥
रूक्षा वै नखदशनाश्चलवृत्ता चंचलप्रकृतिः ॥ २६ ॥

अन्वयार्थौ–(स्फुटितकचा भग्नपादतला) फटे टूटे हैं बाल और पाँवके तलुवे जिसके और (वै इति निश्चयेन नखदशना रूक्षाः) रूखे हैं नख और दाँत जिसके और (चलवृत्ता चंचलप्रकृतिः) चलायमान है आचरण और चंचल स्वभाव जिसका (वातप्रकृतिः वनिता ईदृशी भवति) वातप्रकृतिवाली स्त्री ऐसी होती है ॥ २६ ॥

अजितेन्द्रिया खरांगी गंधर्वविलासहासकलहरतिः ॥
बहुभोजनाल्पनिद्रा बहुलालापभ्रमणशीला ॥ २७ ॥

अस्यार्थः–नहीं वशमें हैं इंद्रिय जिसके और खरदरा है अंग जिसका गाने और भोग हँसी कलह करनेमें है प्रीति जिसकी और बहुत भोजन और थोड़ा सोनेवाली–बहुत बोलने और फिरनेका है स्वभाव जिसका ॥ २७ ॥

धूसरशरीरवर्णा छायाविद्वेषमधुरसा शिशिरा ॥
किंचिद्विवृत्ताक्षमुखी शेते विलपति निशि त्रसति ॥ २८ ॥

